राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला-353
ISSN: 2231-0452

# महस्विनी

# MAHASVINĪ

विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका
(Peer-reviewed and Refereed Research Journal)

कुसुमम् : अगस्त - डिसेम्बर २०२२
सम्पुटम् : द्वितीयम्
Vol. August - December 2022
Part : Second

प्रधानसम्पादकः
आचार्यः जि.एस.आर्.कृष्णमूर्तिः
कुलपतिः

सम्पादकः
आचार्यः कोराड सूर्यनारायणः



राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)

राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला – ३५३ ISSN: 2231-0452

# महस्विनी
# MAHASVINĪ

विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका
(Peer-reviewed and Refereed Research Journal)

**कुसुमम्** : अगस्त – डिसेम्बर २०२२ **सम्पुटम्** : द्वितीयम्

प्रधानसम्पादकः
आचार्यः जि.एस.आर्.कृष्णमूर्तिः
कुलपतिः

सम्पादकः
आचार्यः कोराड सूर्यनारायणः

राष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
तिरुपतिः

# महस्विनी

(विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका)

**ISSN : 2231-0452**

कुसुमम्  : अगस्त – डिसेम्बर २०२२
सम्पुटम्  : द्वितीयम्

प्रकाशनवर्षम् : २०२२
प्रतिकृतयः  : १५०

© राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः – ५१७५०७, आन्ध्रप्रदेशः।

प्रकाशकः

**कुलसचिवः**
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

संयोजकः

**अनुसन्धानप्रकाशनविभागः**
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

NS University Publication Series No. - 353 ISSN: 2231-0452

# MAHASVINĪ

**(Peer-reviewed and Refereed Research Journal)**

**Volume :** August - December 2022 **Part :** Second

General Editor

**Prof. G.S.R. Krishna Murty**

**Vice - Chancellor**

Editor

**Prof. K. Suryanarayana**

**NATIONAL SANSKRIT UNIVERSITY**

**(Central University)**

**TIRUPATI**

**MAHASVINĪ**
(Peer-reviewed and Refereed Research Journal)
**ISSN : 2231-0452**

Volume : August - December 2022
Part : Second

Year of Publication : 2022
Copies printed : 150

© National Sanskrit University, Tirupati - 517507, A.P.

Publisher :

**REGISTRAR**
National Sanskrit University,
Tirupati, Andhra Pradesh

Co-ordinator :

**Research and Publications Department**
National Sanskrit University, Tirupati

**Disclaimer :** The views expressed in the Research papers are those of the authors and not of the editors.

**Prof. G.S.R. KRISHNA MURTY**
VICE - CHANCELLOR

**NATIONAL SANSKRIT UNIVERSITY**
(A Central University established by an Act of Parliament)
**TIRUPATI – 5175107 (A.P.)**

# अभिनन्दनकुसुमम्

अखिलाण्डकोटिब्रह्माण्डनायकस्य शेषाचलश्रीनिवासस्य पद्मावतीजाने: श्रीवेङ्कटेशस्य कृपाकटाक्षेण नैरन्तर्येणैधमानस्याविश्वं कीर्तिं लभमानस्य तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य शोधप्रकाशनविभागेन प्रकाश्यमानाया: सुप्रथिताया विद्वन्मण्डलीसीक्षिताया: परामृष्टायाश्चास्या 'महस्विनी' इत्याख्याया: शोधपत्रिकाया कुसुममिदं प्रकाश्य विद्वत्तल्लजानां करकमलयो: सादरं समर्पयितुं नितान्तं मोमोत्ति मे स्वान्तम्।

तत्र आप्राक्कालान्निरवच्छिन्नं प्रवर्तमाने प्रवर्धमाने च गवेषणाकार्ये नैके विपश्चित्पश्चिमा विविधशास्त्रनदीष्णा: पूर्वतनानां विचारविगर्भितशेवधीन् विमृश्य तैस्तत्रानाविष्कृतान् स्वोपज्ञान् विषयानधिकृत्य ग्रन्थान् प्रणीय शोधप्रबन्धाँश्च विनिर्माय संस्कृतवाङ्मयं संवर्धयन्तोऽ-नुसन्धानक्षेत्रस्य सीमानमपि नित्यं परिवर्धयन्तो दृश्यन्ते बद्धपरिकरा:। तामेव परम्परामिदानीमपि अनुसरन्त आधुनिकविद्वांस:, शोधार्थिनो युवगवेषकाश्च स्वस्वविषये क्रियमाणे शोधकर्मणि गुणवत्तामादातुं यतमाना वर्तन्ते। तै: कृतं कार्यं परिशील्य समीक्ष्य च प्रोत्साहयितुं सहायिका भवन्ति एतादृश्य: शोधपत्रिका:। तदर्थं बहुभि: संस्थाभि: निकायैर्वा विदुषां मार्गदर्शनेन बहुविधशोधपत्रिका: प्रकाश्यन्ते। एतदुद्दिश्यास्माकं विश्वविद्यालयेनापि तत्र-तत्र कार्यरतेभ्यो विद्वद्भ्य:, प्राध्यापकेभ्य: शोधच्छात्रेभ्यश्च शोधनिबन्धान् शोधलेखान् सङ्कलय्य विद्वन्मण्डलीद्वारा तेषां गुणवत्तां मौलिकतां च परीक्ष्य विद्वत्समीते: समीक्षाया: संस्तुते: परं संस्तुतान् लेखान्समादृत्य पत्रिकेयं प्रकाश्यते। अनेनानुसन्धानक्षेत्रे गवेषणारतच्छात्राणां कृते नूतनसिद्धान्तानां काचिदपूर्वा सरणि: समुपलब्धा भवतीति मे द्रढीयान् विश्वास:। महस्विन्याश्चेदं कुसुमं पण्डितानां पाण्डितीप्रपूर्णै: लेखै: सुशोभितशशीव सुशोभतेतरां नितराम्। एवञ्चास्या: पत्रिकाया एतादृशं सुन्दरं कलेवरं

सम्पादयितुं यैर्मनीषिभिरवयवरूपाः स्वीया लेखाः समर्पितास्तेभ्यः समेभ्यः हृदयेन धन्यतावचांसि प्रकटयामि।

एवमेव एतादृशप्रकाशनकार्यस्य साफल्याय निरन्तरं प्रवर्तमानो नः शोधप्रकाशनविभागः तथैवान्तर्बाह्यसदस्यैः समन्विता प्रकाशनसमीक्षासमितिश्च, यस्या मार्गनिर्देशने एतत्प्रकाशनकार्यं सुसम्पन्नमिति सर्वेषामपि समितिसदस्यानां शोधप्रकाशनविभागीयानाञ्च कृते कृतज्ञतां मदीयां निवेदयामि।

इत्थं श्रीवेङ्कटेशस्य कृपाकटाक्षेण विश्वविद्यालयेन निर्विघ्नतया सुरभारतीसेवेयं सदैव प्रवर्ततामित्याशया पुनरपि भगवते मदीयान् प्रणामान् संसूच्य महस्विनीयमागामिनि काले प्रकाश्यमानैः कुसुमैः स्वज्ञानसुरभिणा लोकान् रञ्जयन्ती इतोऽपि महनीयतां प्राप्नुवन्ती च समेषां प्रीतिकरा भवत्वीति कामयते।

इत्थम्

सुबुधबुधजनविधेयः

**(आचार्यः श्रीगुल्लपल्लि रामकृष्णमूर्तिः)**

## सम्पादकमण्डली

**प्रधानसम्पादकः**

**आचार्यः जि.एस.आर्.कृष्णमूर्तिः**

**कुलपतिः**

**सम्पादकः**

**आचार्यः के. सूर्यनारायणः**

अनुसन्धानप्रकाशनविभागाध्यक्षः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**सदस्याः**

**आचार्यः ए.वि.नागसम्पिगे**

निदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

**आचार्यः के.प्रतापः**

आचार्यचरः, श्रीवेङ्कटेश्वरविश्वविद्यालयः, तिरुपतिः

**आचार्यः टि.वि.राघवाचार्युलु**

दर्शनसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**आचार्या सि.ललिताराणी**

साहित्यसंस्कृतिसङ्कायप्रमुखा, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. शिवरामभट्टः**

सहाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. राजेशमीना**

सहाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. सोमनाथदाशः**

सहायकाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा.सीहेच्. नागराजु**

सहायकाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. दिलीपकुमारमिश्रः**, शोधसहायकः

# महस्विनी

## (तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयशोधपत्रिका)

१. एषा षाण्मासिकी शोधपत्रिका।

२. अस्या: प्रकाशनं प्रतिवर्षं जनवरी–जुलाईमासयो: भवति।

३. अस्या: प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेरुद्बोधनं प्रोत्साहनं विविध–दृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च।

४. अस्यां तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धा: प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादन–भावानुवाद–टिप्पण्यादिपुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. प्रकाशितनिबन्धस्य प्रतिमुद्रणानि पत्रिकायाश्च स एव अङ्क: लेखकाय नि:शुल्कं दीयते, यस्मिंस्तदीयो निबन्ध: प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृतवाङ्मयसम्बद्धानां विविधासु भाषासु प्रणीतानां ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। तदर्थं द्वे प्रकाशितप्रतिकृती प्रेषयितव्ये। आलोच्यग्रन्थस्य समालोचना यस्मिन्नङ्के प्रकाशिता सोऽप्यङ्को ग्रन्थकर्त्रे नि:शुल्कं दीयते, समालोचना–पत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्या वार्षिकशुल्कं रू.२५५/–, द्विवार्षिकशुल्कं रू.४२५/–, त्रिवार्षिकशुल्कं रू.६८०/– सन्ति, इदं शुल्कं **कुलसचिव:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:, आन्ध्रप्रदेश:–५१७५०७** इति सङ्केतेन बैंकड्राप्ट द्वारा प्रेषणीयम्।

९. पत्रिकासम्बन्धी सर्वविध: पत्रव्यवहार: **सम्पादक:, महस्विनी–शोधपत्रिका, राष्ट्रियसंस्कृतविश्वविद्यालय:, आन्ध्रप्रदेश:, तिरुपति:–५१७५०७** इति सङ्केतेन विधेय:।

— **सम्पादक:**

**सू.** — शोधलेखप्रणेतार: यथाकालं स्वकीयान् संस्कृताङ्गलभाषाप्रणीतान् शास्त्रविषयकान् अनुसन्धानलेखान् प्रेषयन्तु, यथावसरं सम्पादकमण्डलस्यानुशंसानुरूपं लेखा: प्रकाशयिष्यन्ते।

# सम्पादकीयम्

संस्कृतवाङ्मये अनुसन्धानस्य क्षेत्रं व्यापकं वर्तते। प्राचीनैर्महर्षिभि: प्रतिपादितविषयेषु नवीनतत्त्वान्वेषणम् उत प्रसङ्गानुसारं नवीनपदार्थस्य प्रतिपादनम् अनुसन्धानस्य द्वारमुद्घाटयति। स्वविकल्पानुसारं विद्वांस: काले काले समाजस्य अपेक्षानुसारं नवीनाविष्कारं कुर्वन्त एव भवन्ति अकृषत च। भाषाक्षेत्रे प्रायोगिकक्षेत्रे च अनुसन्धानस्य स्वरूपं भिन्नं भवितुमर्हति। परन्तु उभयत्रापि नवीनतत्त्वान्वेषणमिति समानं वर्वर्ति। संस्कृतं भाषाक्षेत्रे वर्तत इति कृत्वा व्याख्यानरूपम् अनुसन्धानं बहुधा व्यापकं स्थानमावहति। अत: संस्कृतवाङ्मये अभियुक्तै: प्राचीनकालादारभ्य अद्य यावत् नवीनतथ्यप्रतिपादकं व्याख्यानात्मकम् अनुसन्धानकार्यं विहितमस्ति। तर्हि ततोऽप्यधिकं नवीनं किं वा अवशिष्टमस्तीति केषाञ्चन शोधलेखकानां मनस्सु नूतनविषयमधिकृत्य लेखनावसरे अनुयोग: जागर्ति। परन्तु कस्यापि विषयस्य गभीरावलोकनेन वारं वारम् अधिगमनेन च विद्यमाने विषये नवीनचिन्तनं स्फुरति आहोस्वित् अवशिष्टं नवीनं तत्त्वं वा प्रादुर्भवति। अत: शोधलेखनात् पूर्वं कस्यापि विषयस्य कूलङ्कषमध्ययनम् अवश्यं क्रियते। येन समाजोपयोगि नवीनशोधकार्यं समेषां पुरस्तात् समायायात्।

एवमेव नूतनविषयप्रतिपिपादयिषितृणां शोधलेखकानां लेखान् बहुभ्य: वत्सरेभ्य: प्रकाशयन्ती शिक्षाक्षेत्रे महनीयं स्थानमावहति राष्ट्रियसंस्कृतविश्वविद्यालयेन प्रकाश्यमानेयं 'महस्विनी' सार्थकनामधेया शोधपत्रिका। अस्या: महस्विन्या: प्रकाश्यमानेऽस्मिन् कुसुमे विभिन्नशास्त्रेषु कृतपरिश्रमवताम् आचार्याणां शोधच्छात्राणां विदुषां च लेखा: प्रकाश्यन्ते।

एतेषां शोधलेखानां समीकरणे मूल्याङ्कने च नैकेषां विदुषां साह्यमनुसन्धान-प्रकाशनविभागेन प्राप्तमस्ति। एवमेव विश्वविद्यालयस्य कुलपतीनां प्रेरणया प्रोत्साहनेन च

इयं 'महस्विनी' अविच्छिन्नतया प्राकाश्यमेति। विश्वविद्यालयस्य शैक्षणकिसङ्कायप्रमुखाणां मार्गदर्शनं सन्दर्भेऽस्मिन् अस्माभिः प्राप्यत। तथा च सम्पादकमण्डलीसदस्याः अस्याः शोधपत्रिकायाः अन्तिमस्वरूपप्राप्तौ साह्यमदुः। विश्वविद्यालयस्य कुलसचिवसमेताः समे अधिकारिणः अस्याः प्रकाशने प्राशासनिकम् अपेक्षितं साहाय्यमकार्षुः। अतः अनुसन्धानविभागपक्षतः एतेभ्यः समेभ्यः धन्यवादान् वितनोमि।

**(आचार्यः के.सूर्यनारायणः)**

सम्पादकः

# शोधलेखानुक्रमणी

**कुसुमम् :** अगस्त – डिसेम्बर २०२२ **सम्पुटम् :** द्वितीयम्

| | | पुटसंख्या |
|---|---|---|
| १. | **माघे नवशब्दनिकरः** | 1 |
| | - डा. अभय सिंहः | |
| २. | **हंससन्देशे कवेर्वामनभट्टस्य प्रतिभावैशिष्ट्यम्** | 15 |
| | - डा. अदिति वसुः | |
| ३. | **बाणासुरविजयचम्पूकाव्यसमीक्षा** | 21 |
| | - डा. कम्भम्पाटि साम्बशिवमूर्तिः | |
| ४. | **ऊहचिन्तनम्** | 38 |
| | - डा. श्रीरामः ए.एस्. | |
| ५. | **वास्तुशास्त्रदृष्ट्या पर्यावरणविमर्शः** | 51 |
| | - डा. कृष्णकुमारभार्गवः | |
| ६. | **महाभारतस्य आदिपर्वान्तर्गतशापाः मानवप्रवृत्तेः नियन्त्रणञ्च** | 62 |
| | - डा. एम्.के. सुनीता | |
| ७. | **महाभारतोक्तः त्रिपुरसंहारकथायाः सन्देशः** | 73 |
| | - डा. जे.बि.चक्रवर्ती | |
| ८. | **काव्येषु बिम्बविधानप्रक्रिया** | 79 |
| | - डा. भारतभूषणरथः | |
| ९. | **सांख्यदर्शने मनोविज्ञानम्** | 87 |
| | - डा. ए. शेखररेड्डी | |

१०. **मीमांसाज्ञानपरम्परानुसारेण धर्माधर्मयोः लक्षणविचारः** 95

- महेशचिदम्बरभट्टः

११. **शक्तिवादः** 104

- अभिषेक मुखोपाध्यायः

१२. **Advaita Philosophy Depicted in the Aṣṭāvakragītā** 120

- Dr. Shylaja

१३. **Role of Yoga for Stress Management in Information Technology Industry** 128

- Dr. D. Jyoti & Dr. M. Mary Sujatha

१४. **Bhaskaracharya's Trigonometry - A Sampler** 138

- Prof. V. Ramesh Babu & T.V. K. Bala Hanuman

१५. **A Study on Optical Character Recognition for Grantha Lipi - A Pathway to Accessible Sanskrit Literature** 155

- K.Samkeerthy ; K.Homprakash & R.J.Rama Sree

महस्विनी – विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452)
**कुसुमम् :** अगस्त - डिसेम्बर २०२२ **सम्पुटम् :** द्वितीयम्

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# माघे नवशब्दनिकरः

**अभयसिंहः**

**लेखसारांशः**

प्रत्यग्रपदघटनापटुः माघकविरसौ निजप्रातिभमहसा काव्यजगति सर्वमूर्धाभिषिक्तः शेखरायते। कविकोविदोसौ नवनवपदगुम्फनैः कवितावनितामलञ्चकार। माघेन काव्यकलानिकषं व्यधायि - **''क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः**[1]'' निकषमिमं मनसिकृत्य माघः परम्परागतं शिशुपालकथानकं स्वप्रतिभयाभिनवतत्त्व-समावेशेनालंकृत्य महाकाव्यानुगुणं विदधे। माघस्य काव्यशैली अलंकारबहुला यस्यानुवर्तनं परवर्तिभिः कविजनैरक्रियत। माघः परिष्कृतपदविन्यासस्य निपुण आचार्यो यतः काव्यशास्त्रेष्वभिधया पदार्थनिरूपणं उत्कृष्टकाव्यस्य लक्षणं न प्रत्युत वक्रोक्तिमण्डितमेवेति ब्रुवन्ति काव्यविद अत एव माघकाव्ये समासबाहुल्यं वर्णनप्राचुर्यं चित्रबन्धयोजना च दृग्गोचरीभवति। नवनवोन्मेषशालिनी प्रतिभा मता इति वचनानुगुणं महाकवयोपि नवनवप्रयोगरुचयो भवन्ति, माघस्तेष्वन्यतमः श्रेष्ठतमश्च अत एवेदमाभाणकं लोके प्रसिद्धिमुपागतः **-'नवसर्गगते माघे नवशब्दो न विद्यते'**। सामवायिकाः, गोपानसी, चन्द्रकी, अनीचकाशः, अब्दभूः, नवनागवल्लिः इत्येतान् नूत्नपदप्रयोगानिमानिह प्रास्ताविके समासेन प्रस्तूयते सुधीजनदृक्पानाय।

**मुख्यशब्दाः** - वाग्वैचित्र्यम्, नवशब्दः, प्रतिभा, उपमासुषमा, वक्रोक्तिः, माघकाव्यम्, विकटसमस्तपदप्रयोगनिकषः

भारतभूरेषा पुरातनकालादेव नानाशास्त्रवैदुष्यजुषां विपश्चितां प्रसविनी विद्यते।

---

[1] शिशुपालवधम् 4.17
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

काले काले अत्र नैके काव्यकलाकोविदा महाकवयः, दार्शनिकाः, ऐतिह्यविदः, वैयाकरणाश्च सम्बभूवुः। इहैव कदाचित् गुर्जरप्रान्तीये भिन्नमालनामके स्थाने देदीप्यमाननक्षत्रमिव प्रौढपाण्डित्यसंवलितः, प्रखरमेधासम्पन्नो महाकविरेकोऽजायत यस्य प्रातिभप्रभयोद्भासिताखिलकाव्यलोको नवालोकमवाप। आसीत् स कोपि माघाभिधोऽशेषशेमुषीसम्पन्नो महाकविर्यस्योदयेन नैके पण्डितमानिनः पल्लवग्राहिपाण्डित्यगर्वित नामशेषतां जग्मुः। कविकुलावतंसासौ माघकविः **'शिशुपालवधमिति'** बृहत्काव्यप्रबन्धमुबबन्ध येन ग्रन्थरत्नेनास्य प्रतिष्ठाद्यापि अचलमिवाचला सन्तिष्ठते। माघेन निजप्रतिभासनाथितकाव्यकलासन्निवेशमेतस्मिन्नेवं व्यधायि यथा कविकाव्ययोस्तादात्म्यसम्बन्धः समापन्नः, तेन हि काव्यमपि माघेति संज्ञया प्रसिद्धिमुपागतः।

❖ **माघपाण्डित्यं वाग्वैचित्र्यञ्च**

माघस्य पाण्डित्यं वाग्वैचित्र्यञ्च च कविनिकायप्रत्ताभिर्विविधाभिः प्रशस्तिभिर्जनाभाणकैश्च स्फुटमभिव्यज्यत एव यथा-

**''तावद् भा भारवेर्भाति यावन्माघस्य नोदयः''**
**''माघः शिशुपालवधं विदधन् कविवधं विदधे''**
**''मुरारिपदचिन्ता चेत् तदा माघे रतिं कुरु''**
**''मेघे माघे गतं वयः''**

तथा च राजशेखरः - **कृत्स्नप्रबोधकृद्वाणी भारवेरेव भारवेः।**
**माघेनेव च माघेन कम्पः कस्य न जायते।।**

माघः न केवलं काव्यशास्त्रमर्मविद् अपितु काव्येतरशास्त्रेष्वपि तस्याप्रतिहतं ज्ञानमासीदिति शिशुपालवधपरिशीलनेन परिज्ञायते यथा श्रीहर्षः दर्शनशास्त्रमर्मज्ञः

भारविश्च राजनीतिशास्त्रपटुरभिज्ञायते तथैव माघे विविधशास्त्राणां परिनिष्ठितं ज्ञानमवभासते। माघस्य वैदिककर्मकाण्डविषयकं गभीरं ज्ञानं चतुर्दशे सर्गे वर्णितै राजसूययागवर्णनैरभिव्यज्यते यथा याज्ञे कर्मणि ‘सामधेनी’ ऋचां वर्णनम्[1] । तथैव वैदिकस्वरप्रक्रियाविषयकं ज्ञानमपि कवेः सुव्यक्तं भवति यथा- **निहन्त्यरीनेकपदे य उदात्तः स्वरानिव**[2]

दर्शनतत्त्वविदयं महाकविर्नारदस्तुतिसन्दर्भे सांख्यतत्त्वानुकं विवरणं प्रस्तौति[3]। योगशास्त्रप्रावीण्यमप्यस्य परिलक्ष्यते - **‘मैत्र्यादिचित्तपरिकर्मविदो विधाय’** इत्यादिषु। न तावत् आस्तिकदर्शनेष्वेव नास्तिकदर्शनेष्वप्यस्याभिज्ञत्वं प्रकटीभवति-

**सर्वकार्यशरीरेषु मुक्त्वांगस्कन्ध पञ्चकम्।**
**सौगतानामिवात्मान्यो नास्ति मन्त्रे महीभृताम्।।**[4]

बलरामोद्धसंवादेन त्वस्य राजनयज्ञानं स्फुटमभिव्यक्तमेव तथैव संगीतशास्त्रमपि एतस्य सर्वातिशायिज्ञानेन नातितिरोहितमासीत्।[5]

### ❖ माघस्य काव्यकला

एकादशे सर्गे प्रभातकालस्य हृदयहारिवर्णनेन कविः काव्यामृतरसासाराप्लावितसहृदयहृदयानि परितृप्यति। अमुष्मिन्नुपक्रमे ‘रैवतकेति’ भूधरप्रसङ्गस्याद्भुतवर्णननैपुण्येन कविः काव्यमर्मविद्भिः ‘‘घण्टामाघेति’’[6]

---

[1] प्रतिशरणमशीर्णज्योतिरग्न्याहितानां
विधिविहितविरिब्धैः सामिधेनीरधीत्य

[2] शिशुपालवधम् 2.95

[3] युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत्।

[4] शिशुपालवधम् 2.28

[5] श्रुतिसमधिकमुच्यः पञ्चमं पीडयन्तः।

[6] उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।

विरुदेनालंक्रियते।

**'माघे सन्ति त्रयो गुणाः'** इति आभाणकमवधार्य विविच्यते तर्हि कवेः उपमा सौन्दर्यमर्थगाम्भीर्यं पदलालित्यं च नैकेषु पद्येषूपलभ्यते तदिह दिङ्मात्रमत्र प्रस्तूयते-

- उपमासुषमा

**विततपृथुवरत्रतुल्यरूपैर्मयूखैः कलश इव गरीयान् दिग्भिराकृष्यमाणः।**
**कृतचपलविहंगालापकोलाहलाभिर्जलनिधिजलमध्यादेव उत्तार्यतेऽर्कः।।**[1]

प्रसारिताभिः महारज्जुभिः तुल्याकारैः किरणैः गरीयान् कलश इवाकृष्यमाणः सन्नेषोऽर्कः सत्त्वरो विहंगालापकोलाहलः याभिः ताभिः दिग्भिः जलमध्यादुद्धियते यथा कुतश्चित् कूपात् कुम्भः पाशैराकृष्य सकलकलं बहुभिः स्त्रीभिरुद्धियते।

- अर्थगौरवम्

भारविरिव माघोऽपि परिमितशब्देष्वेवार्थगाम्भीर्योत्पादनक्षमः, यथा हि सप्तस्वरसंयोगेन गेये वैचित्र्यमुत्पाद्यते तथैव कतिपयैरेव वर्णैः वाङ्मयेऽनन्तवैचित्रमभिव्यञ्जयितुं शक्यते[2]। तथा च-

**तस्य सांख्यपुरुषेण तुल्यतां बिभ्रतः स्वययमकुर्वतः क्रियाः।**
**कर्तृता तदुपलम्भतोऽभवद् वृत्तिभाजि करणे यथर्त्विजि।।**[3]

यथा सांख्ये अन्तःकरणमाध्यमेन निष्क्रियपुरुषाय कर्तृत्वमुपलभ्यते तथैव याज्ञिकक्रियाः स्वयमकुर्वतोपि ट्टत्विगधिष्ठितयज्ञेन युधिष्ठिरः कर्तृत्वं लेभे।

---

वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम्।।

[1] शिशुपालवधम् 11.44

[2] वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव।
अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता।।

[3] शिशुपालवधम् 14.19

- पदलालित्यम्

पदलालित्यं नाम यथा वीणाझंकृतस्वरैः सहृयहृदयाह्लादो भवति अपि च अर्थाविबोधमप्रतीक्षमाण एव श्रोतुः अन्तःकरणं रसाप्लावितं भवति यथा -

**मधुरया मधुबोधितमाधवी मधुसमृद्धसमेधितमेधया।**
**मधुकरांगनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे।।**[1]

❖ **माघस्य नवशब्दसौष्ठवम्**

नवनवोन्मेषशालिनी प्रतिभा मता इति वचनानुगुणं महाकवयोऽपि नवनवप्रयोगरुचयो भवन्ति, माघः तेष्वन्यतमः श्रेष्ठतमश्च अत एवेदमाभाणकं लोके प्रसिद्धिमुपागतः - 'नवसर्गगते माघे नवशब्दो न विद्यते' । नायमर्थवादः खलु प्रत्युत तथ्यवाद एव, तेष्वन्यतमानि श्रुतिमधुराणि नूतनपदानीह सम्प्रति संकल्यन्ते-

हिरण्यगर्भाङ्गभूः[2] - नारदः (अत्र अङ्गभूशब्दः उपचारान्मानसे{पि पुत्रे वर्तते यथा सरसिजशब्दः स्थलकमलेऽपि)

कंसकृषः, रथाङ्गपाणिः, गदाग्रजः[3] - कृष्णः

चामीकरः[4] , कार्तस्वरः, कलधौतः, - सुवर्णः

समूढः[5] - पुञ्जीकृत इत्यर्थः (समूढः पुञ्जिते भुग्ने इति विश्वः)

अर्जुनच्छविः[1] - धवलकान्तिः (वलक्षो धवलोऽर्जुन इत्यमरः)

---

[1] शिशुपालवधम् 5.20

[2] शिशुपालवधम् 1.1

[3] शिशुपालवधम् 2.69

[4] शिशुपालवधम् 4.31

[5] शिशुपालवधम् 1.4

शितिवासः[2] - नीलाम्बरः (बलरामः)

बिसच्छेदः[3] - मृणालखण्डः (छेदः खण्डोऽस्त्रियामिति त्रिकाण्डः)

चमूरुः[4] - मृगविशेषः

अपचितिः[5] - पूजा (पूजा नमस्याऽपचिति इत्यमरः)

सहस्रभानुः[6] - सहस्रं भानवोंऽशवो यस्य स भास्करः

निर्बर्हितांहः[7] - अपहृतपाप्मा

अहिद्विट्[8] - वृत्रघ्नः इन्द्रः (सर्पे वृत्रसुरेऽप्यहि इति वैजयन्ती)

कञ्चुकः[9] - कवचः ( कञ्चुकः वारबाणोऽस्त्रियाम्)

आस्फालिताः[10] - ताडिताः

कठोरताराधिपः[11] - पूर्णेन्दुः

तुषारमूर्तिः[1] - चन्द्रमाः ( तुषाराः मूर्तिर्यस्य )

---

[1] शिशुपालवधम् 1.6

[2] शिशुपालवधम् 1.6

[3] शिशुपालवधम् 1.8

[4] शिशुपालवधम् 1.8

[5] शिशुपालवधम् 1.17

[6] शिशुपालवधम् 1.17

[7] शिशुपालवधम् 1.29

[8] शिशुपालवधम्.41

[9] शिशुपालवधम् 1.44

[10] शिशुपालवधम् 1.9

[11] शिशुपालवधम् 1.20

तापिच्छम्[2] - तमालस्य पुष्पम् ( कालस्कन्धस्तमालः स्यात्तापिच्छोऽ इत्यमरः)

उज्जासयितुम्[3] - हिंसितुमित्यर्थः ( जसु हिंसायाम् इति चुरादिः)

उपप्लुतम्[4] - पीडितमित्यर्थः

द्युसदः[5] - देवाः (द्यवि सीदन्तीति )

नमुचिद्विट्[6] - इन्द्रः (नमुचिः असुरविशेषः तं द्वेष्टीति)

परेतभर्ता[7] - यमः

तनूनपाद्[8] - अग्निः (तनुं न पातयति जाठररूपेण शरीरं धारयतीति तनूनपादग्निरिति स्वामी)

अपराद्धेषुः[9] - स्खलितबाण ( अपराद्ध इषुः यस्य )

वीवधः[10] - धान्यादिप्राप्तिः

आसारः[11] - सुहृद्बलमित्यर्थः

---

[1] शिशुपालवधम् 1.21

[2] शिशुपालवधम् 1.22

[3] शिशुपालवधम् 1.37

[4] शिशुपालवधम् 1.38

[5] शिशुपालवधम् 1.43

[6] शिशुपालवधम् 1.51

[7] शिशुपालवधम् 1.57

[8] शिशुपालवधम् 1.62

[9] शिशुपालवधम् 2.27

[10] शिशुपालवधम् 2.64

[11] शिशुपालवधम् 2.64

प्रसारः[1] - प्रसारस्तृणकाष्ठादेः प्रवेशः (धान्यादेर्वीवधप्राप्तिरासारस्तु सुहृद्बलम्। प्रसारस्तृणकाष्ठादेः प्रवेशः इति -वैजयन्ती)

उतथ्यानुजः[2] - बृहस्पतिः ( उतथ्यावरजो जीव इति विश्वः)

सामवायिकाः[3] - सचिवादयः( शत्रोः सम्बन्धिनः समवायं समवयन्तीति सामवायिकाः सामवायिकाः संघमुख्याः सचिवादयः )

सारसनम्[4] - पुँस्कटिः

कर्चूरपिशङ्गवासः[5] - हरिः (कर्चूरं हरितालमिव पिशङ्गं वासो यस्य स पीताम्बरो हरिः) हरिः)

पृथुकः[6] - शिशुः ( पृथुकः शावकः शिशु इत्यमरः )

वाहः[7] - अश्वः (वाजिवाहार्वगन्धर्व इत्यमरः)

उडुचक्रम्[8] - नक्षत्रमण्डलमित्यर्थः

अभ्यासः[9] - समीपमित्यर्थः

---

[1] शिशुपालवधम् 2.64
[2] शिशुपालवधम् 2.69
[3] शिशुपालवधम् 2.113
[4] शिशुपालवधम् 3.10
[5] शिशुपालवधम् 3.11
[6] शिशुपालवधम् 3.30
[7] शिशुपालवधम् 3.37
[8] शिशुपालवधम् 3.40
[9] शिशुपालवधम् 3.42

अद्धा[1] - तत्त्वम् (तत्त्वे त्वद्धाञ्जसा द्वयो इत्यमरः)

गोपानसी[2] - वलभी ( 'गोपानसी तु वलभी छादने वक्रदारुणि' इत्यत्र पटलाधारवंशञ्जरमित्याह स्वामी)

चन्द्रकी[3] - मयूरः ( समौ चन्द्रमेचकौ इत्यमरः चन्द्रकः मेचक इति)

नीध्रः[4] - पटलप्रान्तः ( वलीकनीध्रे पटलप्रान्तेऽथ पटलं छदिः)

वितर्दिः[5] - वेदिः (स्याद्वितर्दिस्तु वेदिका इत्यमरः )

तामरसम्[6] - पङ्केरुहः (पङ्केरुहं तामरसम् इत्यमरः)

हस्तिमल्लः[7] - ऐरावतः (हस्तिमल्लोऽभ्रमातङ्गे हस्तिमल्लो विनायके इति विश्वः)

चक्रीवान्[8] - रासभः (चक्रीवन्तस्तु बालेया रासभा गर्दभाः खराः इत्यमरः )

अतुत्थयत्[9] - आच्छादयदित्यर्थः

सौविदल्लाः[10] - कञ्चुकिनः ( सौविदल्लाः कञ्चुकिन इत्यमरः )

कबरी[11] - केशपाशः ( कबरी केशपाशोऽथ इत्यमरः )

---

[1] शिशुपालवधम् 3.49

[2] शिशुपालवधम् 3.49

[3] शिशुपालवधम् 3.49

[4] शिशुपालवधम् 3.55

[5] शिशुपालवधम् 4.12

[6] शिशुपालवधम् 4.13

[7] शिशुपालवधम् 5.8

[8] शिशुपालवधम् 5.11

[9] शिशुपालवधम् 5.17

[10] शिशुपालवधम् 5.19

[11] शिशुपालवधम् 5.25

उद्घूर्णा:[1] - उद्यताः

वल्गद्[2] - चलदित्यर्थः

निर्याणम्[3] - अपाङ्गदेशः (अपाङ्गदेशो निर्याणम् )

नासाविरोकम्[4] - नासारन्ध्रमित्यर्थः (विरोचतेऽनेनेति विरोकं, छिद्रं निर्व्यथनं रोकमित्यमरः)

अयुक्छदः[5] - सप्तपर्णः (अयुजो विषमाश्छदा येषां ते अयुक्छदाः सप्तपर्णाः)

ऊर्जः[6] - कार्तिकमासः (बाहुलोर्जौ कार्तिकिकः इत्यमरः)

आश्वयुजः[7] - आश्विनमासः (स्यादाश्विनो इषोऽत्याश्वयुजः इत्यमरः)

नभस्वतः[8] - पवनः

सुमनोदलतालिनः[9] - सुमनसां पुष्पाणां दलेषु तालयन्ति प्रतितिष्ठन्तीति सुमनोदलतालिनः

सन्तानकः[10] - कल्पवृक्षः

अब्दभूः[1] - जलमित्यर्थः

---

[1] शिशुपालवधम् 5.29

[2] शिशुपालवधम् 5.41

[3] शिशुपालवधम् 5.54

[4] शिशुपालवधम् 6.50

[5] शिशुपालवधम् 6.50

[6] शिशुपालवधम् 6.50

[7] शिशुपालवधम् 6.49

[8] शिशुपालवधम् 6.60

[9] शिशुपालवधम् 6.66

[10] शिशुपालवधम् 6.67

अनीचकाशः[2] - शरदृतुः (अनीचा उन्नताः काशाः अश्ववाला यस्मिन्ननीचकाशे काले शरदीत्यर्थः)

नीरन्ध्रः[3] - सान्द्रः

संहर्षः[4] - सन्तोषः

विव्वोकः[5] - विलासः (यद्यपि विव्वोकोऽनादरक्रिया इति दशरूपककारः तथापि विशेषवाचिनां सामान्ये लक्षणेत्यदोषः)

चक्षुष्यः[6] - प्रियः (प्रियेऽक्षिजे च चक्षुष्यः इति विश्वः)

हरिहेतिहूतिः[7] - चक्रवाकः (हरेर्विष्णोर्हेतिरायुधं तस्य हूतिरिव हूतिराह्वा यस्य तद्धरिहेतिहूति। चक्राह्व इत्यर्थः)

नवनागवल्लिः[8] - ताम्बूल इत्यर्थः

अनुपदी[9] - अन्वेष्टा ('अनुपद्यन्वेष्टा' इति निपातः 'अन्वेष्टानुपदी प्रोक्ता' इति वैजयन्ती)

---

[1] शिशुपालवधम् 6.72
[2] शिशुपालवधम् 6.74
[3] शिशुपालवधम् 8.3
[4] शिशुपालवधम् 8.23
[5] शिशुपालवधम् 8.29
[6] शिशुपालवधम् 8.57
[7] शिशुपालवधम् 9.15
[8] शिशुपालवधम् 9.65
[9] शिशुपालवधम् 9.70

गोत्रभिद्[1] - इन्द्रः (गोत्रं नाम्नि कुलेऽप्यद्रौ इति यादवः)

प्रालेयांशुः[2] - चन्द्रः

तदेवंविधानेके माघप्रयुक्ताः लोकेऽप्रयुक्ताप्रकाशिताश्च बहुविधपदप्रयोगाः शिशुपालवधमहाकाव्य उपलभ्यन्ते। विकटबन्धश्लेषार्थानेकार्थकानवद्यपद्यानि विरहय्यापि साधारणजनचित्तानभिज्ञानि लोकव्यवहारानर्हाणि नैकानि पदानि माघकविः माघकाव्ये प्रयुङ्क्ते । तद्यथा-

वलजः[3] - धान्यराशिः (वलजो धान्यराशिः स्यात् इति वैजयन्ती)

प्रोहः[4] - गजपादः (गजांघ्रिः प्रोहः इति विश्वः)

रवणः[5] - उष्ट्रः (रौतीति रवणः)

कूबरी[6] - रथः (कूबरस्तु युगन्धरः इत्यमरः)

कपिशः[7] - मद्यम् (कश्यं मद्यं च मैरेयं कपिशं कापिशायनमिति हलायुधः)

अयः[8] - दैवम् (अयः शुभावहो विधिः)

---

[1] शिशुपालवधम् 9.80
[2] शिशुपालवधम् 9.87
[3] शिशुपालवधम् 14.7
[4] शिशुपालवधम् 12.5
[5] शिशुपालवधम् 12.9
[6] शिशुपालवधम् 12.21
[7] शिशुपालवधम् 12.38
[8] शिशुपालवधम् 13.23

दस्रः[1] - अश्विद्वयम् (नासत्यावश्विनौ दस्रौ इत्यमरः)

माघकाव्यावगाहनाय विविधशास्त्रनिष्णातत्वमपरिहार्यमेव यथात्र

**पवनात्मजेन्द्रसुतमध्यवर्तिना**
**नितरामरोचि रुचिरेण चक्रिणा।**
**दधतेव योगमुभयग्रहान्तर**
**स्थितिकारितं दुरुधराख्यमिन्दुना।।**

श्लोकेऽस्मिन्नध्येतार्थावबोधाय विजानीयात् यत् कथमिव ज्योतिःशास्त्रे चन्द्रमाः ‘दुरुधरा’ योगं कुरुते।

माघेनाभिज्ञायते स्म यत्तस्य काव्यकृतिरेषा ऋजुधियामशास्त्रचक्षुषां बुद्धिपथं नावतरिष्यतीति। गोमूत्रिकाचक्रादिबन्धबद्धप्रबन्धे प्रवेशः क्लिष्टतरः क्लेशकरश्च-

**विषमं सर्वतोभद्रचक्रगोमूत्रिकादिभिः।**
**श्लोकैरिव महाकाव्यं व्यूहैस्तदभवद् बलम्।।**[2]

तथापि पाण्डित्ययुगीनैषा वृत्तिः न दोषमावहति कवेः वैदग्ध्याभिव्यक्तिरप्यनया गौडीरीत्या स्फुटीभवति अध्येतारः श्लोकव्यूहे युध्यमानाः वीररसानुभूतिञ्च कुर्वते । नूनं शिशुपालवधमहाकाव्यं कवेः कवित्वस्य साफल्यं प्रयोजयति तथाहि महामहोपाध्यायकोलाचलमल्लिनाथसूरिगिरा तावदुच्यते -

**नेतास्मिन् यदुनन्दनः स भगवान् वीरप्रधानो रसः**
**श्रृंगारादिभिरङ्गवान् विजयते पूर्णा पुनर्वर्णना।**
**इन्द्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलं**

[1] शिशुपालवधम् 13.23

[2] शिशुपालवधम् 19.41

**धन्यो माघकविर्वयं तु कृतिनः तत्सूक्तिसंसेवनात्।।**

**सन्दर्भग्रन्थसूचिः**

मुसलगाँवकरः, डॉ. केशवरावः, शिशुपालवध-महाकाव्यम् - माघः, चौखम्बा संस्कृतभवन , वाराणसी, 1998

आप्टे, वामन शिवरामः, संस्कृतहिन्दीकोषः, नवभारतीग्रन्थसंस्थानं, देहली, 2009

उपाध्यायः, बलदेवः, संस्कृत साहित्य का इतिहास, शारदा निकेतनम्, वाराणसी, दशमं संस्करणम् 2001

शास्त्री, भीमसेनः, लघुसिद्धान्तकौमुदी (भैमी व्याख्या), भैमीप्रकाशनं, देहली, पञ्चमं संस्करणम्, 2011

विद्यावारिधिः, विजयपालः, माधवीया धातुवृत्तिः, रामलालकपूरट्रस्ट, रेवली प्रथमं संस्करणम्, 2002

**अभय सिंह**

सहायक आचार्य (तदर्थ), संस्कृत विभाग,

सेण्ट स्टीफंस महाविद्यालय, दिल्ली विश्वविद्यालय, दिल्ली

आवासीय पता - A-137, प्रथम तल, गली सं. 1, हरदेव नगर,

झडौदा, दिल्ली, PIN- 110084

abhayoct22@gmail.com

9518628460

❑❑❑

# हंससन्देशे कवेर्वामनभट्टस्य प्रतिभावैशिष्ट्यम्

**डा.अदिति वसु**

[**सङ्क्षिप्तिका** - वामनभट्टवाणकृतः हंससन्देशः वाक्यपरिपाकभूयिष्टा। यतो हि अत्र सुलभार्थप्रकाशनशैली काव्यार्थाविष्करणशैली च विशिष्टया संलक्ष्यते। अस्मिन् खण्डकाव्ये मातृकाद्वयम् आसीत्। अनया खण्डकाव्यस्य अध्ययनेन अवगम्यते यत् दक्षिणाः पन्डिताः कियन्तः शास्त्रज्ञाः आसन् इति। इदं हि हंससन्देशाख्यं सन्देशकाव्यं कालिदासेन स्पर्धया प्रणीतमिति तथा प्रतिबिम्वरुपेण विराजते।]

संस्कृतकाव्यानां उद्भवः सर्वप्रथमं ऋग्वेदे दृश्यते। तत्र अनेकानि सूक्तानि अथवा मन्त्राः सन्ति। वेदस्थितेषु सूक्तेषु ऋषीणां काव्यहृदयं दरीदृश्यते। प्रधानतया काव्याख्यं किञ्चित् कविकर्म सहृदयहृसमाह्लादकं शब्दार्थ शरीरं, गुणालंकारयुतं रससंस्फुरितं सत् विराजते।

संस्कृतवाङ्मये यथा नाटकेष्वभिज्ञानशाकुन्तलमधिकमुत्कर्ष भजति तथैव खण्डकाव्येषु हंससन्देशस्यैव प्राधान्धं वरीवर्ति। सन्देशकाव्येषु वामनभट्टवाणः कविरत्नरूपि विशिष्टस्थानं विभूषति। महाकवेः मेघदूतस्य प्रभावेन विशेषानुप्राणितः वामनभट्टवाणः। तत् कारनात् मेघदूतात् कथावस्तु स्वीकृत्य, स्वकीयप्रतिभया लेखनकलया हंससन्देशकाव्यमिदं व्यरचयत्।वेमः वामनभट्टबाणः वेमभूपालस्य राजसभायाम् आसीत्। नृपो भूत्वा वेमभूपालः कोण्डवीडु इति प्रसिद्धे आन्ध्रदेशीयस्थाने 1403 ईशवीयवर्षे आसीत्। एतत् समयगणरीत्या चतुर्दश, पञ्चदश

शताब्दयोः मध्यकाले अवर्तत इति। वामनभट्टवाणस्य अन्याः कृतयः – नलाभ्युदयः, रघुनाथचरितम्, वाणासुर-विजयम्, शब्दचन्द्रिका इत्यादयः।

श्रीवामनभट्टवाण हंससन्देशस्य मातृकाद्वयं चेन्नाइ मातृकागारे[1] उपलभ्यते। एका एका कर्गजे अपरा तालपत्रमातृका द्वयं सम्पूणं वर्तते।तत्र अक्षराणि लुप्तानि बहूनि कीट दंशनानि वा सन्ति।तथापि पाठांशस्य परिस्कारेण , तुलनेन च समुचितपाठस्य संयोजनेन पाठसंशोधनं कृतमस्ति।

हंससन्देशस्य इयं कथा दक्षनामा कामी यक्षः हंसद्वारा वार्तां प्रेषितु समीहते।सः विशिष्टे मलयपर्वतस्योपत्यकाप्रदेशे स्थितः सन् स्वप्रियां प्रति सन्देशं प्रेषयति।सन्देशवाहकाय हंसाय दक्षिणभारतस्य च नानाप्रदेशान, नदीः, मुख्यानि स्थानानि च उद्घाटनपुरस्सरमुपस्थापयति।एतत् सर्वं पूर्वसन्देशे 60 पद्यैः, उत्तरसन्देशे 61 मन्दाक्रान्तावृत्तनिबध्दैः पद्यैः च कवि न्यरूपयत।

अप्रतिमप्रतिभाजुषः कवेर्वामनभट्टस्य बिरुदं बाण इत्येतत् एव कवेत्यस्य प्रतिभाप्रकर्षमुपश्लोकयति। अस्ति किञ्चिदाभाणकम् –

अपारे काव्यसंसारे कविरेकः प्रजापतिः।
य़थास्मै रोचते विश्वं तथेदं परिवर्तते।। इति

कविरयं वामनभट्टबाणः रेड्डिराजानां कोण्डवीडुनगरीयाणाम् आश्रयं सम्प्राप्य नलाभ्युदयः रघुनाथचरित्रम्, प्रभावतीपरिणयनाटकम्,हंससन्देशः वेमभूपालचरितम् इति काव्यानि प्रणिनाय। न केवलं काव्यावगाहनपटवी एव तन्मतिः अपि तु शब्दरत्नाकर- शब्दचन्द्रिकयोः कोशयोः प्रणयनेन महतः नवीनस्य शब्दराशोऽपि

---

[1].A Descriptive Catalogue of Sanskrit Manuscripts in the Government Oriental Library, Madras, vol 2

संरक्षणं कविरयं सुष्टु अकरोदिति कोशयोः पठनेन ज्ञायते।

कवि नलाभ्युदयं काव्यं श्रीहर्षस्य प्रतिस्पर्धया रचयामास इति वक्तुं शक्यते।हंससन्देशाख्ये काव्ये वृत्तचयने काव्यवस्तु- काव्यसंरचनयोर्विषये कालिदासेन कृता स्पर्धा स्पष्टीभवति। तदिदम् अधोलिखितैः पद्यैः स्पष्टी भवति-

अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाका ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसंभ्रमालिङ्गितानि ।।[1]

अम्भः पानादरविवलितैरम्बुदैः श्लिष्टपार्श्वां
पाथोराशेः प्रियसहचरीं ताम्रपर्णीमुपेयाः ।
स्नातौ यस्यास्सलिलममलं शुक्तिभिः पीतमेति
श्यामातुङ्गस्तमपरि सरश्लाघनीयामवरस्थाम् ।।[2]

वीचीक्षोभस्तनितविग्रगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।
निर्विन्ध्यायाः पथि हव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ।।[3]

वीचीक्षोभव्यतिकरभवैः वाःकणैर्मिश्रितानां
व्याकीर्णानां सरसिजदले यत्र मुक्ताफलानाम्।

---

[1] मेघदतम् . पूर्वमेघ.22

[2] हंससन्देश. पूर्वसन्देश.12

[3] मेघदूतम्. पूर्वमेघ.29

तारादेश्यं निकरमनिशं न क्षमन्ते विवेक्तुं
मुग्धा मुक्ताग्रहणकुतुकादागता दाशकन्याः।।[1]

कवेर्भाषा स्पष्टा, व्याकरणपरिक्षालिता, कुत्रचित् अत्यन्तं प्रौढा च विराजते। शब्दप्रयोगः प्रसादभरितः कथनीयस्य वा विषयस्य प्रकाशने अत्यन्तं समर्थः वर्तते। तद्यथा-

वीचीक्षोभव्यतिकरभवैः वाःकणैर्मिश्रितानां
व्याकीर्णानां सरसिजदले यत्र मुक्ताफलानाम्।
तारादेश्यं निकरमनिशं न क्षमन्ते विवेक्तुं
मुग्धा मुक्ताग्रहणकुतुकादागता दाशकन्याः।।[2]

सन्देशवाहकस्य हंसस्य मार्गे अधुनापि प्रसिद्धानां नानानगरीणां, नदीनां च जीवद्वर्णनं कविना विहितम्। तादृशं कतिकृतवर्णनम् अतीव मनोहरं ह्यदयावर्जकं च विद्यते। तदितं यथा-

आन्ध्रोद्दसानतिजिगमिषोरग्रतस्ते भवित्री
वेणीभूमेरिव कुवलयामोदिनी कृष्णवेणी ।
आश्लिष्यन्ती तरललहरीवाहया यां सखीव
स्त्रोतोमध्यव्यवहितजला शोबते तुङ्गभद्रा।।[3]

कविकृता भावाविष्करणकलापि ह्यदयमावर्जयति। यथा मेघदूते यक्षः स्वकीयं भावं मेघद्वारा यक्षिण्यै प्रियायै प्रषयति तद्वत् अत्रापि तादृशस्य प्रिययानिहितभावस्य

---

[1] हंससन्देश. पूर्वसन्देश.13

[2] हंससन्देश. पूर्वसन्देश.13

[3] हंससन्देश. पूर्वसन्देश.37

यक्षस्य एव वर्णना वर्तते तथैव भावविह्वलस्य यक्षस्य मघुरिमाः भावाः अत्रोत्तरसन्देशे प्रतिपदं विस्फुरिताः भवन्ति।तदिदं यथा-

वीथ्यां तत्र त्रिचतुरगृहानन्तरं दक्षिणस्यां
दीनं-द्वास्स्थं मदुपगमनप्रार्थनायस्तभृत्यम्।
सीदद्बन्धु स्तिमितमखं वंमद्गृहं तत्प्रतीयाः
यत्रास्ते सा दिवस गणनव्याकुला वल्लभा मे।।[1]
तापं नेतुं तरुणकदलीमण्डपं संश्रयेद्वा
धारागारे किमुत नलिनीतल्परम्ये रमेत (वसेद्वा) ।
सेवेता हिमजललवस्यन्दिनीं चन्द्रशालां वे
वश्योपान्तोपवनभुवि सा संञ्चरेद्वा सखीभिः।।[2]

एतेषु गणेषु काव्यमिदं कविकुलगुरोः कालिदासस्य मेघदूतस्यानुकरणरुपमेव प्रतिभाति, अतएव नातीव रुचिरं, न वा पेशलम्।एतावता प्रतिभावता कविना अन्यदेवेतोऽपि रमणीयं काव्यमेव प्रणेतुं शक्यसम्भवमासीत् किन्तु प्रतिस्पर्धया पूरितमिदं काव्यं न सर्वत्र प्रचारे आसीत्। अतएव द्वित्रमात्रकासु एव परिरक्षितम् उपलभ्यते।

य़था अनुसन्धानपूर्वकं मया वामनभट्टवाणकृतः मया हंसन्देशसामग्रीभिः युक्तस्सन् राष्ट्रियसंस्कृतविद्याविठे विशिष्टाचार्यस्य उपाधिरेव प्राप्तम्। तस्मिन् समये हंससन्देशस्य अध्ययनेन प्राचीनरुपप्रकृतिः भावना च कथम् आसीत् इति अनुभूयते। अत्र खण्डकाव्ये शब्दसंयोजना, अलङ्कारप्रयोगशैली, रसविचारः, गुणप्रयोगः कवेः

[1] हंससन्देश. उत्तरसन्देश.19

[2] हंससन्देश. उत्तरसन्देश.30

प्रतिभायाः प्रमाणं भवति। तदेव खण्डकाव्योऽयं संस्कृतवाङ्मयस्य अनुपमं कृतिरत्नं एव प्रतिभाति।

**सहायकग्रन्थाः**

1. उण्णी, एन पी, केरलीयसंस्कृतसन्धेशसमीक्षा, राष्ट्रियसंस्कृत संस्थानम्, दिल्ली 1995
2. द्विवेदी रेवाप्रसाद, कालिदास ग्रन्थावली, (Complete work of Kalidasa) काशी हिन्दु विश्वविद्यालय, वाराणसी, 1997
3. वानार्जी डा पतितपावन, उत्कलेषु संस्कृतगीतिकाव्यविकाशधारा, नाग प्रकाशक दिल्ली.
4. Krishnamachariar, A History of classical Sanskrit Literature, Motilal Banarsidass, Delhi, 1900

लघुप्रवन्धः –

वामनभट्टबाणविरचितस्य हंससन्देशाख्यस्य खण्डकाव्यस्य पाठसमीक्षात्मकं अध्ययनञ्च, राष्ट्रियसंस्कृतविद्यापीठम्, 2009

संस्कृताध्यापिका
शहीद नुरुल इसलाम् महाविद्यालय,
कलकाता

❑ ❑ ❑

# बाणासुरविजयचम्पूकाव्यसमीक्षा

**डा. कम्भम्पाटि साम्बशिवमूर्तिः**

समस्तकाव्यप्रक्रियानामिव चम्पूकाव्यस्य बीजमपि वेदेष्वेव दृश्यते। ऋग्वेदीय-ऐतरेयब्राह्मणे हरिश्चन्द्रोपाख्यानं गद्यपद्यसम्मिश्रितं भूत्वा चम्पूमार्गे एव प्रचलति। कृष्णयजुर्वेदे तैत्तरीय-मैत्रायणी-कठसंहितासु गद्यपद्यमिश्रितरचना परिदृश्यते। अथर्ववेदेऽपि कुत्रचित् गद्यशैली प्रयुक्ता। आरण्यकग्रन्थाः प्रायः गद्ये एव निबद्धाः। उपनिषदः गद्यपद्योभयात्मकाः त्रिप्रकारकत्वेन विरचिताः। रामायणमहाभारतादिषु भागवतादिपुराणादिषु तत्र तत्र गद्यस्य प्रयोगः सूक्ष्मरूपेण दृश्यते। पुराणेषु नैकविधाख्यानेषु गद्यं चूर्णिकाभेदेन प्रयुक्तं विद्यते। रूपकाणि तु गद्यपद्यात्मकतयैव रचितानि। अत्र संवादाः गद्ये, पद्ये च रचिताः। भासकालिदासादिकवयः स्वरूपकेषु पद्यगद्ययोः सालङ्कारां, कलात्मिकां समाञ्च शैलीं प्रायोजयन्। बौद्धकथासाहित्ये तु चम्पूशैली बहुधा प्रयुक्ता। पञ्चतन्त्रादिकथासाहित्येऽपि चम्पूशैली गद्येन सह पद्यमपि दृश्यते।

**चम्पूशब्दस्य व्युत्पत्तिः –**

“चपि” धातोः “उ” प्रत्यये कृते चम्पू इति शब्दः निष्पद्यते। चम्पयति, चम्पति इति वा चम्पूः इति व्युत्पत्त्यर्थः कथयितुं शक्यते। “चप्” धातोः नमन-ज्ञान-प्राप्ति-मोक्षात्मका अर्थाः विद्यन्ते। अतः चम्पू शब्दस्य मोक्षसहोदरस्य आनन्दस्य प्राप्तकारिणी इत्यर्थो भवितुमर्हति। **हरिदासभट्टारकः** चम्पूशब्दस्यार्थमित्थं प्रत्यपादयत् यत् -

"चमत्कृत्य पुनाति सहृदयान् विस्मितीकृत्य प्रसादयति" इति चम्पूः। चम्पू इत्यभिधानमपि द्रविडपदात् सम्पू इति शब्दान्निष्पन्नमिति कथने औचित्यं प्रतिभाति। अर्थात् चमत्कारप्रधाना सहृदयहृदयाह्लादकारिणी चम्पूरिति भावः। चम्पूकाव्यभेदः आदौ दाक्षिणात्येन दण्डिनैव प्रादर्शि। यथा –

**मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः।**
**गद्यपद्यमयी काचिच्चम्पूरित्यपि विद्यते।।**[1]
**न पद्यैरवद्यैरपि गद्यैर्ललितास्तुद्यैः कृतिभिरियं हृद्यम्।**
**तुलसीप्रवालविचकितकलितामालेव भगवतः शौरेः।।**[2]

गद्यपद्यमिश्रेण यः काव्यमार्गः द्राविडभाषासु सुप्रसिद्धः, विशेषप्रचारे च वर्तते, स एव प्रक्रियाविशेषः संस्कृते च प्राविशत्। श्रीविद्यावाचस्पतिमश्रः शम्भुलिङ्गेश्वरविजयचम्पूकाव्ये चम्पूकाव्यविषये एवमभिप्रैति यत् -

**सद्यस्फूर्तिसमुद्यदुक्तिरचनावैदग्ध्यवैशद्यतो**
**गद्यं संस्कृतवाचि पद्यमपि वा निर्मातुमेकैककम्।**
**वैशारद्यमिहाद्य न क्वचिदहो श्लाघ्यं पुनर्विद्यते**
**गद्यालीयुतपद्यबद्धरसवत्च्चम्पूकृते का कथा ?।।**[3]

संस्कृते गद्यस्य वा पद्यस्य वा भवतु, तन्निर्माणं तु समयस्फूर्ति-सदुक्तिरचना-पाण्डित्यप्रकर्षेणैव भवति। परन्त्वधुना तादृक्प्रशंसनीयं पाण्डित्यवैशारद्यं कुत्रापि अस्ति? नास्ति। गद्यपद्यमिश्रितस्य रसभरितस्य चम्पूकाव्यस्य विषये किमु वा वक्तव्यम् ? सद्यःस्फूर्तिसदुक्तिरचनापाण्डित्यप्रकर्षगुणविशिष्टपरिनिष्ठितेन सुप्रतिष्ठितेन सुप्रसिद्धेन श्रीवाधूलगोत्रोद्भवेन, कन्दालवंशजेन श्रीवेङ्कटाचार्येण ग्रथितमिदं बाणासुरविजयचम्पूकाव्यं सुप्रसिद्धमस्ति। तस्य समीक्षणमत्र विधीयते।

**कविपरिचयः**

कविः स्वयमेव स्ववंशगोत्रपितृगुरुसम्प्रदायादिविशेषान् काव्यस्यास्य प्रथमोल्लास्यान्ते अवर्णयत्। यथा –

**"इति श्रीमद्वाधूलकुलकलशपाथोनिधिराकासुधाकरसर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्य-वरदगुरुवरकरुणाकटाक्षलब्धभाष्यार्णवतात्पर्यकणेन, तदनुग्राहितपाणिनीयोदय-नीयजैमिनीयादिसम्प्रदायेन श्रीमत्कन्दालकुलतिलकचतुस्तन्त्रपारीणदिवाप्रदीपबिरुदाङ्क-श्रीनिवासार्यतनयेन, सहजविनयेन सुरसद्मगिरिनगरवास्तव्येन नव्यदिव्यगव्यभव्यसाहिती-सम्प्रदायपारावारदर्शिना, वेङ्कटाचार्यकलिते बाणासुरविजयचम्पूविजयाह्वये चम्पूप्रबन्धे .....**"[4]

**निवासस्थानम् -**

बाणासुरविजयचम्पूकाव्यस्य रचयितुः श्रीवेङ्कटाचार्यस्य निवासस्थानम् - रायचूरमण्डले लिङ्गाङ्गिसूगूरमध्ये विद्यमानं सुरपुरमिति पत्तनं यत्कालान्तरे मैसूरुराज्य अन्तर्गतमभवत्।

**वंशः -**

कविरयं वाधूलवंशमूलपुरुषस्य श्रीकन्दालवंशजस्य श्रीनिवासताताचार्यस्य अण्णय्यदीक्षितः, श्रीनिवासाचार्यः इति द्वौ पुत्रौ आस्ताम्। अण्णय्याचार्यस्य प्रथमपुत्रः- किरीटिबिरुदाङ्कितो वेङ्कटाचार्यः। श्रीनिवासताताचार्यस्य द्वितीयपुत्रः श्रीनिवासाचार्यः - तत्त्वमार्ताण्डादि- अनेकसंस्कृतग्रन्थानां रचयिता। तर्कमीमासाशास्त्रेषु अप्रतिहतबुद्धिश्च। अस्य पुत्रः श्रीवेङ्कटाचार्यः बाणासुरविजयचम्पूकाव्यस्य कर्त्ता।

**गुरुः -**

अस्य वेङ्कटाचार्यस्य गुरुः श्रीशेषाचलरमणघण्टावतारः, शमनिधिः, प्रपन्नानां चिन्तामणिः, अतिदयालुः, आश्रिताकल्पवृक्षः **श्रीवेङ्कटेशः** ।[5]

**उपासकः -**

अयं कविः हयग्रीवदेवतोपासकः इति ज्ञायते यत् प्रत्येकमुल्लासं हयग्रीवप्रार्थनयैव समारभत। यथा -

**अत्युत्साहनटन्महानटजटाजूटाटवीसम्भ्रमद्-**
**गङ्गातुङ्गतरङ्गसङ्गरपटुप्रौढोक्तिकृद्वैभवा।**
**श्रीभर्तुः कुहनाहयस्य नितरां लोकत्रयोज्जीविनी**
**ह्येषा दोषविनाशिनी विजयतामास्माकजिह्वाञ्चले।।**[6]

**अपि च पञ्चमोल्लसस्य प्रारम्भे -**

**विधत्तां मे प्रौढिं विशदविशदैर्वीक्षणलवै-**
**र्कैरैव्याख्यामुद्रां दधदखिलभद्रास्पदगतिः।**
**सुधांशोर्बिम्बोऽन्तः स्फटिकमणिसच्छायाविलसत्-**
**प्रतीको लक्ष्मीवान् ह्यवदनरूपः स भगवान्।।**[7]

अनेन ज्ञायते यत् कविः - महाविष्णोः परमात्मनः हयग्रीवस्वरूपस्य परमोपासकः इति।

**भक्तिः-**

**जडमपि मां सज्जयते पुरुषोत्तमपरमतत्त्वभक्तिः।।।**[8]
**पुण्यं दिव्यगुणैर्विहीनमखिलैर्हैयैस्समस्तात्मता-**
**मापन्नं स्वशरीरभूतचिदचिद्वर्गं श्रियः कामुकम्**
**ध्यायं प्राप्यमशेषनैगमवचोवेद्यं विभूतिद्वयी-**

**नेतारं कमितारमानततेस्त्वां भावयामो वयम्।।**[9]

कविः एवं वक्ति यत् – पुरुषोत्तमे मे परमतत्त्वभक्तिः मन्दबुद्धिमपि मां काव्यरचनायां सिद्धीकरोतीति प्रतिपादयन् स्वीयां पुरुषोत्तमभक्तिं प्रकटयामास। अपि च दिव्यगुणविभूषितं, श्रीपतिं, सर्वशास्त्रपाण्डित्यप्रदातारं सर्वदा भावयामि इति परमात्मनि श्रीवेङ्कटेश्वरस्वामिनि स्वानन्यपरमभक्तिं च निरूपयति।

**सम्प्रदायः-**

**त्रय्यान्तार्णवमप्रमेयमनिशं सत्तर्कसङ्गाहित-**
**प्रौढाहीनगुणस्फुरन्मतिमहामन्थानसन्धानतः।**
**श्रीलाभाय विमथ्य तत्त्वसुधया रक्तान् बुधान् प्रीणयन्**
**नीयादक्षतशासनः क्षितितले रामानुजार्यो मुनिः।।**[10]

इत्येवं श्रीरामानुजाचार्यं, तत्सम्प्रदायवैशिष्ट्यं बहुधा च प्रशशंस। अपि च - **“सान्तरालधवलोर्ध्वपुण्ड्रेण पाञ्चरात्रतन्त्रं व्याचख्यासुरिव, सन्ततानुवर्तितचरमश्लोकोऽपि तपस्विनामचरमश्लोकः, अन्तर्यामिततया पुरुषप्रवर्तनम्, अर्चारूपेण सकलदुरितहरणमाकलय्य पञ्चधावस्थितस्श्वेतद्वीपवैकुण्ठाधिवासरसिकस्य।”**[11] इत्यादिवर्णनेनायं कविः श्रीवैष्णवसम्प्रदायी, विशिष्टाद्वैतवेदान्तमतावलम्बी, श्रीरामानुजसम्प्रदायानुयायीति ज्ञायते।

**रचनाशैली-**

कवेः वेङ्कटाचार्यस्य काव्यरचना धाराप्रवाहवच्चलति। शब्दार्थगाम्भीर्यसम्पन्ना चास्ति। सुगन्धपुष्पवद्भवति। काव्यशैली च नितान्तं प्रौढा।

**कवितारीतिः-**

**न बन्धे पारुष्यं न च मधुरशब्दे कठिनता**

**समासा दीर्घापि त्रिवलिरुचिरस्निग्धमृदुला।**
**जगुर्वैदर्भीं यत्कनकरशनां केचन वयं**
**सकान्तिं गौडीयां मनसि नितरां निश्चिनुमहे।।**[12]

अत्र कविः विदर्भराजतनयां रुक्मिणीं वर्णयन् स्वरचनाशैलीं प्रकटयति। यथा - "केचन कवयः वैदर्भीरीतिमेव उत्तमा रीतिरिति मन्वते। वयं तु कान्तिगुणसहितां (ओजः कान्तिमती गौडीया- माधुर्यसौकुमार्यगुणयोरभावात् समासबहुला अत्युद्भटपदा च) गौडीयामेव रीतिं मनसि नितरां कुर्मः" इति काव्यरचनाशैलीं प्रकाशयति।

**वैदुष्यप्रकर्षः –**

**वेदविद्यावैशारद्यम् –**

कविः वेङ्कटाचार्यः साङ्गोपाङ्गतया वेदाध्ययनमकरोत्। पुनश्च अष्टविकृतिपाठेषु उद्दण्डपण्डितः। उपनिषद्ज्ञाने निष्णातः। यतोहि सन्दर्भानुसारं वेदमन्त्रान् क्रमाद्यष्टविकृतिपाठानां परामर्शं, वेदोपनिषत्प्रतिपादितविषयविमर्शं विधाय स्वीयं वेदविद्यावैशारद्यं प्रकटयामास। यथा –

**वक्तुं यं मनसा विचेतुमपि वा शक्ताः स्फुरल्लोचनाः**[13]

रुक्मिणी - अमितभक्तसन्ततिसमुद्धारेण महोदरेण दारेण साळङ्कृता विराजते इति तस्याः वैभवं वक्तुं, मनसि न विचिन्तयितुं शिव-भृगु-आदिशेषाः असमर्था अभूवन्निति कविः वर्णयन् "यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह" इति तैत्तरीयोपनिषद्भाष्यवाक्यानुसारं मनसि भावयन्नेव उपर्युक्तभावगर्भितश्लोकं व्यरचयदिति अवगम्यते।

**सा हि श्रीरमृता सतां मनसि या पद्माक्षवक्षः स्थले** [14]

(सा हि श्रीरमृता सताम्। मा नो हिंसीः जातवेदो गामश्व पुरुषं जगत्)

**पदक्रमलोकपूततया, जटानुबन्धदेदीप्यमानतया, तथागतकथाशतधारणजागरितो मूर्तिमान् वेद इव..... ।**[15]

**पदे शीर्षे संख्यां दधदनलकल्पां दृशि तदा ।**[16] (सहस्रशीर्षा पुरुषः, सहस्राक्षः सहस्रपात्)

**वीर्यं विष्णोर्नुकमिति महाभारती सा पुराणी ।**[17] (विष्णोर्नुकं वीर्याणि प्रवोचं.... [18]

**योन्तस्सर्वचराचरो बहिरपि व्याप्य स्थितः कर्मणाम्**[19] (अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः)[20]

**छन्दःशास्त्रप्रावीण्यम् –**

कविः सन्दर्भानुसारं, रसानुकूलञ्च विविधप्रकारकाणां छन्दसां प्रयोगे अतीव दक्षो वर्तते। यद्यपि शार्दूलविक्रीडिते यथेच्छं क्रीडितोऽयं कविः, तथापि न केवलं प्रसिद्धानां छन्दसां प्रयोगे अपि तु नर्कुटक-मदलेखा-माणवक-रुक्मवती-वैश्वदेवी-इत्यादीनां विरलछन्दसां च प्रयोगे च महान् कुशलः।

**तर्कशास्त्रपाण्डित्यम् –**

**तमो द्रव्यं नैल्यादिति हि यद्यभाषिष्ट भगवान्**
**तदेतत्सत्यं न स्फुरति नितरां जैमुनिमुनिः।**
**तमो वेति श्रुत्या प्रकटितनिजभावत्वमलका-**
**त्मनो वक्रस्योन्दोः प्रणयियदमुष्या विजयते।।**[21]

अन्नम्भट्टः **तर्कसङ्ग्रहे द्रव्यविभजनावसरे तत्र द्रव्याणि। पृथिव्यप्तेजोवाय्वा-काशकालदिगात्ममनांसि नवैव** इति प्रतिपादयन् द्रव्याणि नवैव इति सिद्धान्तं न्यरूपयत्। तमेव सिद्धान्तमङ्गीकुर्वता कविनानेन स्पष्टयता तमसः दशमद्रव्यत्वेन

प्रतिपादितवतः जैमिनिमहर्षेः वचनं तिरश्चकार। अपि च द्रव्याणि नवैवेति सिद्धान्तमङ्गीचकारेति ज्ञायते।

**बाणासुरविजयकाव्यसमीक्षा**

**नामौचित्यम् –**

कविना स्वकाव्यस्य बाणासुरविजयः इति नामकरणमकारि। यद्यपि उषापरिणय-उषानिरुद्धपरिणयादिनामभिः चम्पूकाव्यानि मिलन्ति। कविरयमपि उषानिरुद्धयोः प्रणयोदन्तमेव न्यवर्णयत्। अतः उषानिरुद्धयोः नायिकानायकयोरेव नाम्ना स्वकाव्यस्य नामकरणं किमर्थं नाकरोदिति, **बाणासुरविजय** इति नाम किमर्थमकरोदिति विषयः चिन्तनीयो वर्तते। वस्तुतः कवेः लक्ष्यं - केवलं काव्यनिर्माणं नेति भाति। स्वकाव्यरचनामाध्यमेन श्रीरामानुजाचार्यस्य विशिष्टाद्वैतमतस्य प्रचारः, हरिहरयोर्मध्ये हरेः महत्त्वप्रकटनं, श्रीवैष्णवसम्प्रदायस्य गरिमायाः स्थापनम् इत्यादयः अंशाः लक्ष्यभूता आसन्निति कविप्रणीतश्लोकैः, उपनिबद्धसन्दर्भैः, प्रयुक्तशब्दभावैः प्रदर्शितोपनिषद्वाक्यप्रमाणैश्चावगम्यते।

बाणासुरविजयः इति शीर्षकोऽयम् तु कवेर्लक्ष्यं सम्पूर्णतया प्रतिफलति। यतो हि **बाणासुरस्य विजयः** इति विग्रहवाक्ये क्रियमाणे सति बाणासुरः स्वपुत्रीमुषां परमात्मनः श्रीकृष्णस्य पौत्रायानिरुद्धाय प्रदाय विजयं प्राप।

द्वितीयतः - बाणासुरः स्वस्मिन् स्थितस्य शिववरप्रसादप्रभावप्रभवादहङ्काराद्विजयं प्राप।

तृतीयतः बाणासुरः परमशिवभक्तः। तस्योपरि विजयः कदाचित् शैवमते एव विजयः, ततः स्वमतस्थापनमिति लक्ष्यसिद्धावपि विजयः इति सर्वं विचिन्त्यैव कविना स्वकाव्यस्य **बाणासुरविजयः** इति यन्नाम कृतं तत्सर्वथा औचित्यपूर्णं प्रतीयते।

**कथावस्तु-**

बाणासुरविजयचम्पूकाव्यस्य कथावस्तु श्रीमद्भागवतस्य दशमस्कन्धार्गतस्य 61,62,63 अध्यायेभ्यः स्वीकृतम्। यथा-

**राजोवाच-**

**बाणस्य तनयामूषामुपयेमे यदूत्तमः।**
**तत्र युद्धमभूद्घोरं हरिशङ्करयोर्महत्।।**
**एतत्सर्वं महायोगिन्! समाख्यातुं त्वमर्हसि।।** इति

**पात्राणां परिचयः –**

प्रद्युम्नः- रुक्मिणीश्रीकृष्णयोः पुत्रः। अनिरुद्धः - रतेः प्रद्युम्नस्य पुत्रः। उषा - बाणस्य पुत्री। बाणः - बलेः ज्येष्ठपुत्रः। कुम्भाण्डः- बाणस्य मन्त्री। चित्ररेखा- कुभाण्डस्य पुत्री, उषायाः सखी।

कोटरा- बाणस्य माता। श्रीकृष्णः, महेश्वरः, सात्यकिः, नारदः, पाराशरः।

**प्रस्तुते काव्ये - प्रतिपादितचम्पूकाव्यलक्षणम् –**

**पद्यैः केवलतां गतैरलमलं गद्यैरपद्यैर्मनो**
**हृद्या सैव हि सूक्तिरेतदुभयारब्धा मया भाष्यते।**
**भूषावस्त्रगुणोज्ज्वलापि ललना तारुण्यलावण्ययो-**
**र्योगादेव हि कामिनामतितरामानन्दकन्दायते।।**[22]

कविः चम्पूकाव्यस्य महत्त्वं प्रतिपादयन् केवलं पद्यैर्वा केवलं पद्यरहितैर्गद्यैर्वा पर्याप्तम्। उभयविधसूक्तिरेव मनोहृद्या भवति। यथा - भूषणैः, पट्टवस्त्रैः प्रकाशमाना ललना तारुण्यलावण्ययोर्योगेनैव कामिनाम् अत्यन्तमानन्ददायिनी भवति खलु।

**प्रस्तुतकाव्ये गद्यपद्यसंख्या –**

अस्मिन् चम्पूकाव्ये 49 संख्याकाः गद्यभागाः, नैकछन्दस्सु निबद्धाः 283 संख्याकाः श्लोकाश्च वर्तन्ते।

**प्रार्थनाश्लोकः-**

**श्रीलक्ष्मीकान्तनाभीकमलमधुझरीलोलरोलम्बमाला-**
**झङ्कारस्सम्पदौघं दिशतु विधिचतुर्मुख्युदीर्णागमानाम्।**
**तादाम्त्यं ख्यापयन् यस्स्वरनिकरमयः पादपद्मावताना-**
**मिन्द्रेशानादिदेवप्रवरपरिषदां कामितार्थामरद्रुः।।**23

**शब्दचित्रम्-**

**अत्यादरवत्या स तु रत्या शुभगत्या**
**प्रत्याहितदीप्त्या सुरसत्येव सुदत्या।**
**भोगैरविभागैरनुरागैर्जुष्टः**
**परिदृष्टः परिपुष्टोऽन्वजुष्ट।।**24

कविः वेङ्कटाचार्यः नूतनमार्गेणैकं श्लोकं व्यरचयत् यस्मिन् श्लोके पादचतुष्टयादिवर्णानां पठनेन अनिरुद्धः इति प्रतीयते। अक्षराणामयं प्रयोगः कवेरस्य वर्णप्रयोगचमत्कृतिमाविष्करोति। यथा-

**अ**नर्घ्यसौन्दर्यघनप्रतीको
**नि**जप्रतापौष्ण्यनिराकृतद्विट्।
**रु**चा स भास्वानिव चारुसंवि-
**द्ध**रा सुरद्रुर्विरराज राजा।।25

**भावचित्रम्-**

कविरयं न केवलं सुन्दरशब्दपदप्रयोगे दक्षः अपि तु विविधभावचित्रयुतानां, नर्मगर्भविचाराणां च प्रकटने सिद्धहस्तः इति तन्निबद्धश्लोक-गद्यांशानां परिशीलनेन प्रतीयते।

**क्षीणश्चन्द्रः पशुपतिरहो यत्र नूनं विषादी**
**जातिद्वेषः कुसुमसमये पादपाग्रे वियोगः।**
**दुर्वंशानां गिरिषु नितरां सम्भवो नैव यस्या-**
**माशासङ्गे यशसि न जनेष्वेवमुज्जृम्भते स्म।।**[26]

अत्र क्षीणः, विषादी-वियोगीत्यादिशब्दानां प्रयोगेण तत्तद्व्यक्तिषु विद्यमानानां धर्माणाञ्च प्रतीतिं विदधाति। यथा - क्षीणः= क्षीणत्वरूपो गुणः। धर्मवाचकः। अर्थात् क्षीणत्वगुणविशिष्टः शिवः इत्यर्थः।विषादी = विषादित्वरूपो गुणः। धर्मवाचकः। अर्थात् विषादित्वगुणविशिष्टः शिवः इत्यर्थः। वियोगः= वीनां योगः।वीनां= पक्षिणां, योगः= सम्बन्धः।

अपि च –

**चित्रं नैतदुपेत्य कृष्णमनिशं दीप्तप्रभावोऽर्जुनः**
**कृष्णां रक्ततमां करोति न गुणं स्वीयं जहातीति यत्**
**भूयः कृष्णयशः सुधानुकलिता कर्पूरधूलीरुचं**
**धत्ते चित्रमिदं निशा हिमकरे रागं च तत्याज यत्।।**[27]

रात्रिः चन्द्रे अनुरक्ता भवति। यदा श्रीकृष्णस्य यशः चन्द्रमसोऽपि धवलं जातं तदा रात्रिः चन्द्रे अनुरागं तत्याजेति वर्णयति कविः।

**वर्णनाचातुर्यम् –**

लोकोत्तरवस्तुवर्णानानिपुणः कविः इति वाक्यं प्रमाणयन् कविरयम् अभूतवस्तुनां, अद्भुतसौन्दर्यसन्दर्भानां वर्णने स्वाप्रतिहतगतिं प्रदर्शयति। विशिष्य तत्तत्सन्दर्भानुरूपशब्दप्रयोगे, अपूर्वभावप्रकटने चायमतीव निषणातः। सूर्योस्तमय-चन्द्रोदयवर्णमेकत्र एकदैव कुर्वतानेन कविना प्रयुक्तशब्दराशिः, अर्थप्रकर्षः, वर्णनाचातुर्यं च नितरां सहृदयहृदयानां हृत्सु प्रकर्षेण हर्षं, जनयिष्यन्तीत्यत्र नास्ति लेशमात्रं संशीतिः। स्थालीपुलाकन्यायेनात्रोदाहरणं प्रस्तूयते। यथा –

**नीलोत्तुङ्गसुदीर्घबाहुयुगलीदत्त्वकाशौ शिरः**
**कोटीरान्तरितस्थितां कलयतो यस्याब्जचक्रेश्वरौ।**
**एकान्तास्तमयोदयोन्मुखनिशानाथाम्बुजातेशयोः**
**शोभां पश्चिमपूर्ववार्थिगतयोः स्वर्णाद्रिमालम्बतोः।।**[28]

**सूक्तिसरणिः-**

कविरयं स्वग्रन्थे प्रसक्तानुप्रसक्ततया लोकोक्तीनां, सूक्तीनामपि प्रयोगमकरोदिति अधोदर्शितोदाहरणैर्वाक्यैः स्पष्टं भवति।

1. वसन्ते वृष्टिश्चेत् फलति यदि मुक्तामणिगणः? (1-38)
2. कुटिलजनाः प्रायः कालानुचिन्तनतत्पराः। (2-8)
3. नो चेत् सर्वेऽपि सर्वं स्वहृदयविषयं स्वानुरूपं भजेरन्।(2-20)
4. मदोन्मत्तः केनाप्यपरिहृतभाग्यो विजयते। (2-28)
5. दृढे ध्वान्ते लोकं कबलयति खद्योततततयो
   यतेरन् किं काष्ठानिचयविशदीकारविभवे। (3-25)
6. विषैर्मिश्रं शाल्यौदनमिव दुरापं खलु नृपाम्। (4-5)

7. जामातुर्दशमग्रहत्वमुचितीकुर्वन् जयानासुरम्। (4-27)
8. पथिकमनोविदारणकृते क्रकचावलिरिव। (4-34)
9. पीयूषे कटुता कदापि जनिता चित्रं न तत्केवलम्
   क्ष्वेलो यन्मधुरः करोति सुमनोहर्षं तदेवोन्नतम्। (4-44)

**भगवतः अवतारवर्णनम्-**

कविः द्वितीयोल्लासे भगवतः महत्त्वं ख्यापयन् परब्रह्मणा शिष्टजनसंरक्षणाय, दुष्टजनशिक्षणाय च स्वीकृतानामवताराणां वर्णनमकरोत्। तत्र मत्स्य-कूर्म-वराह-नृसिंह-वामन-परशुराम-रामावतारानवर्णयत्। यथा- नृसिंहावतारः -

**स्तम्भाद्योऽवततार निष्ठुरनखज्वालाकरालाकृतिः**
**वक्षः संक्षपयन् हिरण्यकशिपोर्जिष्णुं परं प्रीणयन्।**
**लोकावग्रहभञ्जनञ्च कलयन् शिष्टाद्यसंस्थापनं**
**प्रह्लादं च नयन्स एव कुहनापञ्चाननात्मा भवान्।।**[29]

**रसपोषणम् –**

चम्पूकाव्यस्य प्रधानरसं श्रृङ्गारं तं रसं पोषयन्नेव वीराद्यन्येषां रसानां पोषणं सम्यक्तया चकार कविः वेङ्कटाचार्यः। दिङ्मात्रमत्र उदाह्रियते –

**भयानकः –**

**कुम्भाण्डः कूपकर्णो विपुलरथगतौ तावुभौ सीरपाणेः**
**नासीरे शस्त्रपातैर्विदलितवपुषौ शेषरक्ताक्षिकोणौ।**
**सैन्यं सम्प्राप्तदैन्यं सपदि कलयतो दिव्यशस्त्रास्त्रविद्या-**
**वैशद्याद्रक्तनद्याकलनकृतभयात्तत्र धानुष्कवत्या।।**[30]

**अद्भुतः –**

"सापि स्ववियोगविभवसाक्षात्कृतचतुर्दशभुवनाकारं, कलाभिज्ञप्रथमगोपनीय-वैभवा सद् अपरिमितसौन्दर्यसिन्धून् सुरासुरबन्धून् पुरन्दरप्रमुखाननिमिषान्, गानकलापारीणकृतगर्वान् गन्धर्वान्,रम्भादिमनोहरान् किन्नरान्, पातालवासिनो वासुकिप्रमुखान्, मध्यमलोकमहनीयाननागतान्, वर्तमानान्, शिबिनलनहुषादीन् पृथिवीपालशिरोमणीन्, भगवन्तं तं गोपिकाप्राणवल्लभं वासुदेवं तत्तनूजान साम्बप्रद्युम्नप्रमुखान् चित्रे विलिख्य दर्शयामास ।[31]

**उषायाः सखी चित्ररेखा मदनावस्थायां**

**अलङ्कारपोषणम् -**

छेक-लाट-स्फुट-वृत्ति-अर्थानुप्रसासादि-शब्दालङ्काराणां प्रयोगे कवेः अप्रतिहतगतिः सम्पूर्णकाव्ये सर्वत्र दृश्यते। यथा –

**विचित्रमणिभूषणैः हृदयपोषणैर्भाषणैः**
**समस्तरमणीमनः कृतगवेषणैरीक्षणैः।**
**पुरः कमलकाननं विकचमल्लिकासन्ततिं**
**किरन्निव मनोहरन्निव चसर्प वामभ्रुवाम्।।**[32]

अपि चोपमोत्प्रेक्षाश्लेषार्थान्तरन्यासाद्यतिप्रसिदधैस्सह लोकोक्तिश्रुत्युक्त्यादि-विरलानाम् अर्थालङ्काराणां प्रयोगे चायं कविः नितरां सिद्धहस्तः इति निरूपयति अस्य अलङ्कारप्रयोगपाटवम्। उदा- लोकोक्तिः -

**लोकप्रवादानुकृतिर्लोकोक्तिरिति कथ्यते।**
**सहस्व कतिचिन्मासान् मीलयित्वा विलोचने।।**[33]

**प्रस्तुते काव्ये लोकोक्तिः-**

**जङ्घायां जवमादिशन्नतिभयोद्योगं स्वगेहान्तरे।**
**दीनः प्राप समस्तसैन्यविकलस्ताद्दङ्गहावीर्यवान्।।**34

अत्र **जङ्घायां जवमादिशन्** इति लोकवादानुकृतेः प्रयुज्य वर्णनमकरोदिति हेतोरत्र लोकोक्तियलङ्कारः। एतादृशप्रयोगाः काव्ये बहुत्र दृश्यन्ते।

ग्रन्थान्ते कविः आदिमध्यावसानेषु भूयाच्छुभं मङ्गलमति धिया श्रीपतेः श्रीवेङ्कटेश्वरस्य, श्रीभाष्यकारस्य रामानुजाचार्यस्य, सिद्धान्तचूडामणेः, रामानुजीयस्य विशिष्टाद्वैतवेदान्तस्य च जयो भूयादिति प्रार्थयति। यथा -

**जीयाच्छेषधराधरेन्द्रमकुटीरत्नं श्रियः कामुकः**
**जीयाद्भाष्यकृदुज्ज्वलः शुभगणै रामानुजस्संयमीट्।**
**जीयाद्वेदवतंसदेशिकगुरुस्सिद्धान्तचूडामणिः**
**जीयादाहिमरश्मिताकरमिदं रामानुजीयं मतम्।।**35

एवम्प्रकारेण श्रीवेङ्कटाचार्येण निबद्धमिदं काव्यं चम्पूकाव्यसाहित्यकाशे राकाशशिरिव भातीति निश्चप्रचमिति **शम्।।**

**सन्दर्भाः –**

1. काव्यादर्शः 1-31
2. बालभारतम्
3. बा.वि.च.- 1-18
4. तत्रैव - गद्य-1-10
5. तत्रैव- 1-7

6. तत्रैव - 1-2
7. तत्रैव - 5-1
8. तत्रैव - 1-15
9. तत्रैव - 1-6
10. तत्रैव - गद्य - 2-3
11. तत्रैव - 6-17
12. तत्रैव - 1-37
13. तत्रैव - 1-26
14. तत्रैव - 1-40
15. तत्रैव - 2-3
16. तत्रैव - गद्य- 2-3
17. तत्रैव - 6-2
18. तत्रैव - 6-6
19. तै. सं -1/2/13/9
20. बा.वि.च. 6-16
21. तै.उ. 4-11-25
22. वृ.र. 3-98
23. बा.वि.च.- 1-7
24. तत्रैव - 1-1
25. तत्रैव - 2-2
26. तत्रैव - 1-22

27. तत्रैव - 1-31
28. तत्रैव - 1-32
29. तत्रैव - 2-24
30. तत्रैव - 5-44
31. तत्रैव - 3-5
32. तत्रैव - 3-21
33. कुवलयान–अ -सं 113
34. तत्रैव - 5-62
35. तत्रैव - 6-45

**डा. कम्भम्पाटि साम्बशिवमूर्तिः**
परीक्षानियन्त्रकः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

❑ ❑ ❑

**महस्विनी – विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** अगस्त - डिसेम्बर २०२२ **सम्पुटम् :** द्वितीयम्
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

# ऊहचिन्तनम्

**डा. श्रीरामः ए एस्**

निगमाय सुकर्मबोधिने, मुनये जैमिनये च सूत्रिणे।
शबराय च भाष्यकारिणे, नम ईशाय कुमारिलात्मने॥

**शोधसारः** - धर्माधर्मयोः निरूपणार्थं प्रवृत्तमिदं दर्शनं मीमांसा नाम। धर्मश्च प्रकृतिविकृतिरूपेण द्वेधा स्थितः। उपदेशरूपात् वेदात् प्रकृतेः अनुष्ठानं सिद्ध्यति। विकृतेः अनुष्ठानं तु अतिदेशेन सेत्स्यति। विकृतौ अतिदिष्टवाक्यानि सर्वाणि न कार्यकराणि भवन्ति। अतः तेषां कार्यवशेन रूपान्तरकरणं कार्यम्। प्रकृतौ अन्यादृशरूपेण विद्यमानमन्त्रादेः विकृतौ कार्यवशेन अन्यथाकरणस्य नाम ऊहः इति। श्रीखण्डदेवाचार्यैः ऊहस्य लक्षणमित्थं कृतं यथा - येन सम्बन्धेन यद्धर्मावच्छिन्नवृत्तित्वं यस्य प्रकृतौ श्रुतम्, तस्य तेन सम्बन्धेन विकृतौ तद्धर्मावच्छिन्नभिन्नवृत्तित्वम् इति। सः ऊहः त्रिविधः मन्त्रोहः, सामोहः, संस्कारोहः इति। प्रकृते लेखे ऊहस्य लक्षणमुक्त्वा, दलकृत्यादिकं विधाय, तत्प्रकारमुक्त्वा, तदुदाहरणानि कथयित्वा ऊहस्य परिचयः प्रदास्यते।

जैमिनिसूत्रितायां धर्मज्ञानफलिकायां पूर्वमीमांसायां प्रमाणभेदशेषत्वप्रयुक्तिक्रमाधिकारविवेचनाय पूर्वषट्कस्य प्रवृत्तिः। उत्तरषट्के च सामान्यविशेषातिदेशनिरूपणपरमूहादीनां निरूपणं क्रियते।

द्वादशलक्षण्यां तत्रापि सप्तमाष्टमयोः अतिदेशं निरूप्य नवमे ऊहः निरूप्यते। नवमाध्याये चत्वारः पादाः सन्ति। तत्र प्रत्येकस्मिन् पादे प्रत्येकं विषयो विचार्यते। तदुक्तं न्यायमालायाम् -

"ऊहारम्भोऽथ सामोहो मन्त्रोहस्तत्प्रसङ्गतः। नवमाध्यायपादेषु चतुर्ष्वेते प्रकीर्तिताः।।"
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~

प्राकृतोपकारपृष्ठभावेनैव प्राकृतपदार्थाः प्रकृतितो विकृतिं प्रत्यतिदिश्यन्ते। इतरथाप्राकृतकार्यकारित्वं स्यात्। प्राकृतोपकारसम्पादनाय विकृतौ क्वचित् ऊहापेक्षा जायते। ऊहः अतिदेशप्राप्तपदार्थधर्मः इति हेतोः अतिदेशनिरूपणसमनन्तरमूहः उपजीव्योपजीवकभावसङ्गत्या निरूप्यते। ऊहो नाम प्रकृतिसम्बन्धिनः पदार्थस्य विकृतावन्यथाभावः, प्रकृतौ अन्यथादृष्टस्य विकृतौ अन्यथाभावरूपो वा। यथा प्रकृतौ अन्यथापठितस्य देवस्यत्वादिमन्त्रस्य विकृतौ कार्यवशेन अन्यथाभावः। "अग्नये जुष्टं निर्वपामि" इति मन्त्रः प्रकृतौ आग्नेये अन्यथा दृष्टः। अयं मन्त्रः विकृतौ सौर्ये अतिदिष्टः। विकृतेः सूर्यदेवताकत्वात् अग्निपदस्थाने सूर्यपदनिक्षेपं कृत्वा "सूर्याय जुष्टं निर्वपामि" इति अन्यथा क्रियते। एवं मन्त्रोयं विकृतौ प्रकृत्यपेक्षया अन्यथादृष्टः इति ऊहः इति कथ्यते।

**तत्र च सूत्रमिदम्**

यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात्।

**खण्डदेवीयं लक्षणम्**

ऊहितत्वञ्च येन सम्बन्धेन यद्धर्मावच्छिन्नवृत्तित्वं यस्य प्रकृतौ श्रुतम्, तस्य तेन सम्बन्धेन विकृतौ तद्धर्मावच्छिन्नभिन्नवृत्तित्वम् इति।

**ऊहत्रैविध्यम्**

मन्त्रोहः, सामोहः, संस्कारोहः इति ऊहस्त्रिविधः।

**मन्त्रोहः**

मन्त्रोहः इत्यत्र गोबलीवर्दन्यायेन सामातिरिक्तः मन्त्रः ग्राह्यः।

"देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् अग्नये जुष्टं निर्वपामि" इति दर्शपूर्णमासगताग्नेययागाङ्गत्वेन विनियुक्तो मन्त्रः। अयमाग्नेयः प्रकृतिः।

तत्र देवता अग्निः। अतः अग्निपदघटितस्यास्य मन्त्रस्य प्रयोगसमवेतार्थस्मारकत्वं सम्भवति। मन्त्रोयं विकृतौ सौर्ये अतिदिष्टः। तत्र देवता सूर्यः। विकृतेः सूर्यदेवताकत्वात् अग्निदेवताप्रकाशकस्य मन्त्रस्य समन्वयो न भवति इति हेतोः समवेतार्थप्रकाशनाय सूर्यपदघटिततयोह्यते "सूर्याय जुष्टं निर्वपामि" इति। एवमग्निपदस्थाने सूर्यपदनिक्षेपात् ऊहः इति कथ्यते।

**लक्षणसमन्वयः**

अग्निः मन्त्रस्मार्यः। मन्त्रेण अग्निदेवता स्मार्यते इति प्रकृते स्मार्यत्वसम्बन्धः। अग्नौ विद्यमानः धर्मः अग्नित्वम्। अग्निः अग्नित्वावच्छिन्नः। प्रकृतिः आग्नेयः। विकृतिः सौर्यः। विकृतौ देवता सूर्यः। सूर्ये विद्यमानः धर्मः सूर्यत्वम्। सूर्यः सूर्यत्वावच्छिन्नः।

येन सम्बन्धेन - स्मार्यत्वसम्बन्धेन, यद्धर्मावच्छिन्नवृत्तित्वम् अग्नित्वावच्छिन्नाग्निवृत्तित्वम्, यस्य - मन्त्रस्य "देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् अग्नये जुष्टं निर्वपामि" इति मन्त्रस्य, प्रकृतौ - आग्नेये, श्रुतम् – पठितम्, तस्य - मन्त्रस्य, तेन सम्बन्धेन - स्मार्यत्वसम्बन्धेन, विकृतौ सौर्ये, तद्धर्मावच्छिन्नभिन्नवृत्तित्वम् - अग्नित्वावच्छिन्नभिन्नसूर्यत्वावच्छिन्नसूर्यवृत्तित्वात् अस्य मन्त्रस्य ऊहितत्वम्।

**संस्कारोहः**

प्रकृतौ आग्नेये प्रकृतिद्रव्यं व्रीहिः। तादृशव्रीह्युद्देशेन "व्रीहीन् प्रोक्षति" इत्यनेन विधिना प्रोक्षणं विहितम्। विकृतौ प्रकृतिद्रव्यं श्यामाकः। विना प्रोक्षणेन श्यामाकानां विनियोगः न सम्भवति। विकृतौ तु श्यामाकोद्देशेन प्रोक्षणस्य विधानं न कृतम्। अतः व्रीह्युद्देशेन विहितं प्रोक्षणं श्यामाकेषु ऊह्यते।

संस्कारोहस्थले समन्वयः - येन सम्बन्धेन - संस्कार्यत्वसम्बन्धेन,

यद्धर्मावच्छिन्नवृत्तित्वम् -व्रीहित्वावच्छिन्नव्रीहिवृत्तित्वम्, यस्य - प्रोक्षणस्य, प्रकृतौ - आग्नेये, श्रुतम् - पठितम्, तस्य - प्रोक्षणस्य, तेन सम्बन्धेन - संस्कार्यत्वसम्बन्धेन, विकृतौ तद्धर्मावच्छिन्नभिन्नवृत्तित्वम् – व्रीहित्वावच्छिन्नभिन्न-श्यामाकत्वावच्छिन्नवृत्तित्वात् अस्य प्रोक्षणरूपसंस्कारस्य ऊहितत्वम्।

**सामोहः**

एवं सामोहस्थले लक्षणसमन्वयः - आयीभावादिरूपाणां साम्नां येन सम्बन्धेन – अभिव्यङ्ग्यत्वसम्बन्धेन, प्रकृतौ यत्स्थानगतैकारवृत्तित्वं - प्रथमादिस्थानगतैकारवृत्तित्वं श्रुतम्, विकृतौ तेषां तेनैव सम्बन्धेन तत्स्थानभिन्नद्वितीयादिस्थानगतैकारवृत्तित्वात् ऊहितत्वम्।

**लक्षणगतदलविवरणम्**

प्रकृतलक्षणे श्रुतत्वं नाम तात्पर्यमनपेक्ष्य प्रतीयमानत्वम् – शाब्दबोधविषयत्वाभावः - वृत्त्यावगमितम् इति स्वीकार्यम्। तेन एकारवृत्तित्वं शब्दात् न श्रूयते चेदपि न कापि हानिः। सामोहस्थले एकारवृत्तित्वं तु शब्दात् न श्रूयते।

श्रुतत्वमित्यत्र तात्पर्यमनपेक्ष्य प्रतीयमानत्वमिति कुतः, केवलं प्रतीयमानत्वमिति कथनं सम्भवति इति चेत्, प्रोक्षणादिकं व्रीहित्वावच्छिन्नोद्देशेन न क्रियते। अपि तु व्रीहिस्वरूपे आनर्थक्यात् अपूर्वसाधनत्वावच्छिन्नोद्देशेन प्रोक्षणं क्रियते। व्रीहिपदस्य तात्पर्यमपि तदेव। एवं प्रकृतौ अपूर्वसाधनत्वावच्छिन्नोद्देशेन प्रोक्षणं क्रियते, तथैव विकृतौ अपि अपूर्वसाधनत्वावच्छिन्नोद्देशेनैव प्रोक्षणं क्रियते, न तु श्यामाकत्वावच्छिन्नोद्देन क्रियते। तेन विकृतौ तद्धर्मावच्छिन्नभिन्नवृत्तित्वं न सम्भवति इति ऊहलक्षणस्य अन्वयो न स्यात्। परं प्रकृतौ दर्शपूर्णमासीयापूर्वसाधनत्वम् उद्देश्यतावच्छेदकम्। विकृतौ तु सौर्यीयापूर्वसाधनत्वम् उद्देश्यतावच्छेदकम् इतिकृत्वा

लक्षणसमन्वयः इति न मन्तव्यम्। यतः इत्थं स्वीकारे विकृतौ यवप्रयोगेपि दर्शपूर्णमासीयापूर्वसाधनत्वभिन्नसौर्यीयापूर्वसाधनत्वस्य सत्त्वात् लक्षणस्यातिव्याप्तिप्रसङ्गः। अतः श्रुतपदं प्रकृते तात्पर्यमनपेक्ष्य प्रतीयमानत्वबोधकम्। व्रीहिपदम् अपूर्वसाधनत्वावच्छिन्नत्वस्य तात्पर्यम् अपेक्ष्यैव बोधकम्। व्रीहिपदं तात्पर्यमनपेक्ष्य व्रीहित्वावच्छिन्नस्यैव बोधकम्। अतः लक्षणे श्रुतपदं तात्पर्यमनपेक्ष्य प्रतीयमानत्वस्य बोधकम्।

प्रकृतौ येन सम्बन्धेन, विकृतौ तेनैव सम्बन्धेन इति सम्बन्धैक्यस्य विविक्षा कुतः इत्युक्ते पशुपुरोडाशयागस्य चतुर्थ्यन्तपदोच्चारणरूपः देवतोद्देशांशः पशुयागीयदेवतासंस्कारार्थः। सः स्मार्यतासम्बन्धेन अग्नीषोमदेवतायां भवति। विकृतौ सौत्रामण्यां तु "ऐन्द्रवारुणसावित्राः पुरोडाशाः" इति भिन्नदेवता श्रुता। अर्थात् पशुयागीयदेवतापेक्षया अन्याः देवताः पशुपुरोडाशे भवन्ति। अतः अस्यां सौत्रामण्यां तु पशुपुरोडाशयागस्य देवतोद्देशांशः आरादुपकारक इति स्मार्यत्वसम्बन्धापेक्षयान्येन अदृष्टद्वारकसम्बन्धेन क्रतूपकारवृत्तित्वमुद्देशांशस्य भवति। ऊहलक्षणे सम्बन्धैक्याविवक्षायां तु प्रकृते सम्बन्धान्तरस्य सत्त्वात् ऊहलक्षणस्यातिव्याप्तिः स्यात्।

ऊहलक्षणे प्रकृतिविकृतिपदयोः उपादानं कुतः इति चेत् "व्रीहीन् अवहन्ति" इत्यनेन व्रीहित्वावच्छिन्नोद्देशेन अहवननं विहितम्। परं यदा व्रीहिं त्यक्त्वा यवैः अनुष्ठानं क्रियते तदा "व्रीहीन् अवहन्ति" इति विधिवशादेव यवत्वाच्छिन्नोद्देशेन अवहननस्य क्रियमाणत्वात्, येन सम्बन्धेन यद्धर्मावच्छिन्नवृत्तित्वं यस्य श्रुतम्, तस्य तेन सम्बन्धेन तद्धर्मावच्छिन्नभिन्नवृत्तित्वम् इति ऊहलक्षणस्य अतिव्याप्तिः स्यात् ।

तदा तु येन सम्बन्धेन - संस्कार्यत्वसम्बन्धेन, यद्धर्मावच्छिन्नवृत्तित्वम् व्रीहित्वावच्छिन्नव्रीहिवृत्तित्वम्, यस्य - अवहननस्य श्रुतम्, तस्य - अवहननस्य, तेन

सम्बन्धेन - संस्कार्यत्वसम्बन्धेन, तद्धर्मावच्छिन्नभिन्नवृत्तित्वम् – व्रीहित्वावच्छिन्नभिन्नयवत्वावच्छिन्नवृत्तित्वात् अतिव्याप्तिः। अतः अतिव्याप्तेः निवारणाय प्रकृतौ, विकृतौ इति पदयोः उपादानम्।

केवलं यद्वृत्तित्वमिति लक्षणकरणे ऊहलक्षणस्य अतिव्याप्तिः स्यात्। यतः प्रकृतौ उपयुक्तव्रीह्यपेक्षया भिन्नाः व्रीहयः सौर्ये भवन्ति। अतः यद्धर्मावच्छिन्नत्वमिति दलमुपादेयम्। प्रकृतिविकृत्योः व्रीहिव्यक्त्योः भेदेपि तद्गतधर्मस्य भादो नास्ति। तत्र तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकव्रीहिभेदे सत्यपि व्रीहित्वावच्छिन्नप्रतियोगिताकव्रीहिभेदाभावः। विकृतौ यवेन यत्र अनुष्ठानं तत्र अवहननादीनां करणात् ऊहलक्षणस्य समन्वयः भवति चेदपि न दोषः।

विकृतौ सूर्याय इति पदान्तरप्रक्षेपे मन्त्रभेदस्य सत्त्वात् लक्षणसमन्वयो न स्यात्। अग्निपदस्थाने सूर्यपदनिक्षेपेपि मन्त्रभेदः नाङ्गीक्रियते। अतः लक्षणे यस्य तस्य इति पदयोः नानुपपत्तिः।

प्रकृतौ या ऋक् भवति, तत्स्थाने ऋगन्तरस्य ऊहे ऋग्भेदस्य सत्त्वात् ऊहः गौणः। यदि ऋगन्तरस्य निक्षेपेण मन्त्रभेदः सम्भवति चेदपि मुख्योहत्वं सम्पादनीयं तर्हि लक्षणे तस्य इति पदं प्राकृततत्कार्यापन्नान्यतरपरम् इति स्वीकार्यम्।

अयम् ऊहः प्रकृतौ यथा यद्रूपावच्छिन्नोद्देश्यसम्बन्धित्वेन विधानं क्रियते, विकृतौ अपि तद्रूपावच्छिन्नोद्देश्यसम्बन्धित्वेन अतिदेशः भवति चेत् सम्भवति। स्वरूपेण अतिदेशे तु ऊहः न सम्भवति। स्वरूपेण अतिदेशे सति अग्निपदस्यैव अतिदेशः इति सौर्ययागेपि अग्निपदस्यैव अदृष्टत्वादिप्रयोजनानुसारम् आग्नेयपदस्यैव प्रयोगसम्भवात् ऊहो न स्यात्।

प्रकृतौ यादृशोपकारजनकत्वं विकृतौ तादृशोपकारजनकस्य अपेक्षणात् विकृतौ

उपकारपृष्टभावेनैव पदार्थानामतिदेशः, न तु केवलं पदार्थानामतिदेशः।

"व्रीहीन् प्रोक्षति" इत्यादिना प्रोक्षणावहननयोः व्रीहित्वावच्छिन्नोद्देशेन विधानात् व्रीहित्वावच्छिन्नप्रयुक्तत्वमवहननादेः अथवा व्रीहिपदलक्ष्यापूर्वसाधनत्वाच्छिन्नोद्देशेन प्रोक्षणादीनां विधानात् अपूर्वसाधनत्वाच्छिन्नप्रयुक्तत्वमवहननादेः इति चिन्तनीयम्। एवम् "अग्नये जुष्टं निर्वपामि" इत्यत्र अग्निपदप्रयोगः अग्नित्वावच्छिन्नोद्देशेन, अपूर्वसाधनत्वाच्छिन्नोद्देशेन क्रियते इति चिन्तनीयम्।

यदि व्रीह्यादिस्वरूपप्रयुक्तत्वे श्यामाके चरौ व्रीह्यादीनामसत्त्वात् प्रोक्षणादीनां श्यामाके लोपः स्यात्। अतिदेशाभावात् ऊहोपि न भवति। एवं सौर्यस्याग्निदेवताकत्वाभावात् "अग्नये जुष्टं निर्वपामि" इत्यस्य मन्त्रस्य लोपः, न तु ऊहः। अपूर्वप्रयुक्तत्वे तु श्यामाकादेः अपूर्वप्रयुक्तत्वात् ऊहः सम्भवति।

प्रयाजाद्यारादुपकारकस्थाने उद्देश्यतावच्छेदकं न श्रूयत इति उद्देश्यतावच्छेदके कल्पयितव्ये अपूर्वसाधनत्वावच्छिन्नस्य कल्पनामकृत्वा करणानुग्राहकाकाङ्क्षारूपेतिकर्तव्यताकांक्षात्मकप्रकरणेन यागाङ्गतया प्रयाजादीनां विधानं कृतमिति यागत्वावच्छिन्नस्यैव उद्देश्यतावच्छेदकतया कल्पना क्रियते। अपूर्वसाधनत्वावच्छिन्नस्य उद्देश्यतावच्छेदकत्वे प्रधानस्यापि अपूर्वसाधनत्वावच्छिन्नोद्देश्येन विधानात् प्रयाजप्रधानयोः समप्राधान्यापातः। अतः प्रयाजादीनां यागत्वावच्छिन्नयागोद्देशेनैव विधानम्।

तदुपरि प्रश्नः – यागत्वावच्छिन्नस्यैव उद्देश्यतावच्छेदकत्वे प्रयाजादीनां प्रकृतिविकृतिसाधारण्येन पारिप्लवापत्तिः इति। तन्न, यदा यागत्वावच्छिन्नयागमनूद्य विधीयते तदा प्रकरणेन सन्निहितयागमनूद्य विधीयमानत्वात्

सन्निहितयागत्वावच्छिन्नस्यैव उद्देश्यतावच्छेदकत्वम्।

तदुपरि पुनः प्रश्नः – उपदेशेनैव प्रकृतिविकृतिसाधारण्येन अङ्गानां प्राप्तत्वात् अतिदेशोच्छेदः स्यात् इति, तन्न, अतिदेशस्य अपूर्वार्थत्वं यदा कल्प्यते तदा अपूर्वसामान्यार्थत्वमकल्पयित्वा अपूर्वविशेषार्थत्वं कल्प्यते। आग्नेयसौर्ययोः अपूर्वं समानमिति कृत्वा अपूर्वसामान्यार्थत्वमकल्पयित्वा अपूर्वविशेषार्थत्वं कल्पनीयम्। तेन आग्नेयजन्यमपूर्वं भिन्नं, सौर्यजन्यमपूर्वं भिन्नमिति अतिदेशस्य अपूर्वविशेषार्थत्वे कल्प्यमाने आग्नेयापूर्वार्थत्वस्य सिद्धौ सौर्यापूर्वार्थत्वमसिद्धमिति सौर्यापूर्वार्थत्वसिद्ध्यर्थम् अतिदेशः अपेक्षितः। एवमेव यागसामान्यार्थत्वमकल्पयित्वा यागविशेषार्थत्वं कल्पनीयम्। उपदेशस्य आग्नेयार्थत्वसिद्धावपि सौर्यार्थत्वमसिद्धमिति सौर्ययागाङ्गत्वसिद्ध्यर्थम् अतिदेशः अपेक्षितः। एवं च तद्वदिदं कर्तव्यमिति अतिदेशेन आग्नेयस्थानापन्ने सौर्ये अङ्गानामतिदेशः सम्भवति। एवं च आरादुपकारकाणि सर्वाणि यागप्रयुक्तान्येव। "व्रीहीन् प्रोक्षति" इत्यादौ व्रीहिपदोत्तरमेव यदा प्रोक्षणादीनां श्रवणं तत्र व्रीहित्वादिकमेव उद्देश्यतावच्छेदकम्। प्रोक्षणेन विनापि व्रीहिस्वरूपं सिद्धमिति स्वरूपार्थत्वे वैयर्थ्यं स्यात् इति न चिन्त्यम्। आधानसिद्धाग्नीनां फलोत्पादकत्वमिति आधानस्य अग्निस्वरूपसिद्ध्या एव सार्थक्यं यथा, तथा केवलं यागस्य फलजनकत्वं नाङ्गीक्रियते, अपि तु प्रयाजजन्योपकारकयागः फलजनकः।

तदुपरि प्रश्नः – आहवनीयादिकमपूर्वमिति कृत्वा आधानेन विना अग्निसिद्धिः न भवति। परं प्रोक्षणेन विनापि व्रीहिस्वरूपं सिद्धमिति प्रोक्षणस्य स्वरूपार्थत्वे वैयर्थ्यापत्तिः। एतादृशवैयर्थ्यपरिहारार्थं यतः प्रोक्षणं व्रीह्युद्देशेन विहितम्, अतः प्रोक्षितव्रीहीणामेव यागार्थत्वमिति अपूर्वार्थत्वमिति वा कल्पनीयम्। एवं प्रोक्षणस्य उद्देश्यतावच्छेदकं तु व्रीहित्वम् एव, न तु अपूर्वसाधनत्वम्। अपूर्वसाधनत्वस्य तु

लक्षणया कल्पनं स्यात्। तेन निषादस्थपत्यधिकरणविरोधः स्यात्।

अथवा अस्तु "व्रीहीन् प्रोक्षति" इत्यत्र व्रीहिपदे लक्षणा, तथापि लाघवात् उपस्थितत्वात् विजातीययागसाधनीभूतव्रीहित्वावच्छिन्नस्यैव लक्षणया कथनम्, न तु अपूर्वसाधनत्वस्य लक्षणया कथनम्। अपूर्वसाधनत्वे उच्यमाने यवादिसाधारणम् उद्देश्यतावच्छेदकं भवति। विजातीययागसाधनीभूतव्रीहित्वावच्छिन्नरूप-मुद्देश्यतावच्छेदकं तु न यवादिसाधारणम्।

तदुपरि प्रश्नः, यागस्य साधनं व्रीहिः इति निर्णीतत्वात् प्रोक्षितव्रीहिः साधनमिति न कल्प्यते। प्रोक्षणेन विनापि आग्नेयरूपविजातीययागस्य सम्पद्यमानत्वात् विजातीययागसाधनीभूत-व्रीहित्वावच्छिन्नव्रीह्युद्देशेन प्रोक्षणस्य विधानेपि प्रोक्षणं व्यर्थम् इति, तन्न, प्रोक्षणेन विना यागत्वावच्छिन्नस्य उत्पत्तिः स्यान्नाम, पुरं प्रोक्षणेन विना विजातीययागत्वावच्छिन्नस्य उत्पत्तिः न स्यादिति प्रोक्षणस्य न वैयर्थ्यम्।

विजातीयाग्नेययागत्वावच्छिन्नं प्रति प्रोक्षणेन विना काचित् सामग्री न सिद्धा। प्रोक्षणेन विना यागे क्रियमाणे एतादृशवैजात्यं भवति इति सामग्र्यन्तरेण प्रोक्षमेन विना एतादृशवैजात्यावच्छिन्नस्योत्पत्तौ एव वक्तुं शक्यम्। न त्वेतदस्ति। विजातीयाग्नेययागत्वावच्छिन्नं प्रति सामग्री प्रोक्षणादिः इति विधानबलात् अवगम्यते। प्रोक्षणेन विना विजातीययागोत्पत्तौ प्रमाणं नास्ति इति यागस्वरूपार्थत्वे प्रोक्षणादीनां न वैयर्थ्यम्। प्रयाजाद्यारादुपकारकाणामपि यागस्वरूपार्थत्वमङ्गीक्रियते चेदपि न आनर्थक्यम्। एवं च ऊहापेक्षा नास्ति इति पूर्वपक्षे प्राप्ते –

सिद्धान्तः – "व्रीहान् प्रोक्षति" इत्यादौ व्रीहिपदेन विजातीययागसाधनत्वमेव लक्ष्यते। तेन प्रोक्षणादीनामुद्देश्यतावच्छेदकं विजातीययागसाधनत्वमेव। तच्च व्रीहित्वाघटितम्। विजातीययागसाधनत्वे व्रीहित्वस्य घटकतया प्रवेशे श्यामाके तादृशोद्देश्यतावच्छेदकं

नास्तीति अतिदेशाभावेन ऊहो न स्यात्। परम् उद्देश्यतावच्छेदकं व्रीहित्वाघटितमिति अतिदेशसम्भवात् ऊहः सिद्ध्यति।

वस्तुतस्तु - विजातीययागसाधनं न उद्देश्यतावच्छेदकं भवति। विजातीययागसाधनत्वावच्छेदेन प्रोक्षणस्य विधानेपि प्रोक्षणविधेः आनर्थक्यं सम्भवत्येव। यागसामान्यं प्रति क्लृप्तया द्रव्यदेवतादिसामग्र्या यस्य यागस्य उत्पत्तिः, तस्य विशेषयागत्वरूपविजातीययागत्वं सम्भवत्येव। यादृशविजातीययागत्वावच्छिन्नं प्रति प्रोक्षणादेः विधानं तादृशविजातीययागोपि यागत्वावच्छिन्नो भवति। यागत्वावच्छिन्नं प्रति सामग्रीत्वेन क्लृप्तद्रव्यादिना विजातीययागत्वस्यापि आपत्तिः कल्पयितुं शक्या। सामान्यधर्मरूपयागत्वं व्यापकः धर्मः। विशेषधर्मरूपविजातीययागत्वं व्याप्यः धर्मः। व्यापकधर्मावच्छिन्नद्रव्यदेवतादिसामग्र्या निष्पाद्यमानः यागः विजातीयो भवति। प्रोक्षणविधौ यागगतवैजात्यम् उद्देश्यतावच्छेदकं भवति। सामान्यसामग्रीबलात् उत्पन्नः यागः वैजात्यविशिष्टः एव भवति। एतादृशवैजात्यं प्रोक्षणे सत्येव भवतीति प्रोक्षणविधेः सार्थक्यम्। विजातीययागव्यक्तीनां यागसामान्यान्तर्गतत्वात् यागत्वावच्छिन्नं प्रति व्रीह्यादिद्रव्यत्वाद्यवच्छिन्नस्य लोकतः एव कारणत्वावगतेः सामग्रीवशेन यत्र व्रीहिं विनापि सामग्र्यन्तरेण यागः निष्पद्यते तत्र व्रीहिभिः एव यागः कर्तव्यः इति नियमविधित्वं यथा तथैव प्रोक्षणेन विना यागस्य उत्पत्तौ यागस्वरूपार्थत्वे प्रोक्षणस्य वैयर्थ्यं स्यात्। तदा प्रोक्षणेन एतादृशवैजात्यसम्पादनम् अवश्यं वक्तव्यम्। यागसामान्योत्पादकसामग्रीणां यागविशेषोत्पादकत्वं न सम्भवति। यागविशेषोत्पत्तौ यागविशेषसामग्रीसहितविशेषसामग्री कारणम्। प्रोक्षणादिविशेषसामग्र्यन्तराभावे यागविशेषोत्पत्तिरेव न सम्भवति। तदेव "यादृक् तादृक् च होतव्यम्" इति सामान्यसामग्र्या एव विशेषधर्मावच्छिन्नस्योत्पत्तौ लिङ्गम्। अपेक्षितविहितद्रव्यालाभे येन

केनचित् अविहितद्रव्येणापि होमः कार्यः इत्यर्थः अस्य। एवं विशेषसामग्र्यभावेपि वैजात्यावच्छिन्नयागोत्पत्तिः सम्भवति। "व्रीहिभिर्यजेत" इत्यादिद्रव्यविधौ विहितव्रीह्यादिद्रव्यं विनापि द्रव्यान्तरसाहाय्येन यागस्योत्पत्तौ व्रीहिविधेः वैयर्थ्यापत्त्या व्रीहिविधेः नियमविधित्वमङ्गीक्रियते। द्रव्यान्तरस्य प्रतिनिधित्वमपि सम्भवति। "व्रीहिभिर्यजेत" इत्यादिद्रव्यविधिषु, एवं "व्रीहीन् प्रोक्षति" इत्यादिद्रव्यसंस्कारविधिषु अपूर्वसाधनत्वं उद्देश्यतावच्छेदकं वक्तव्यम्। प्रकृतद्रव्येण विनापि द्रव्यान्तरेण यागनिष्पत्तिः भवति। परं द्रव्यान्तरेण यागे क्रियमाणे अपूर्वस्योत्पत्तिस्तु न भवति। उद्देश्यतावच्छेदकम् अपूर्वसाधनत्वम् इति स्वीक्रियमाणे पोक्षणेन विनापि एतादृशस्य अपूर्वस्य अनुत्पद्यमानत्वात् प्रोक्षणस्य वैयर्थ्यशङ्का न भवति। अपूर्वजननानुकूलयोग्यता आरादुपकारकेण विना न भवति। तेषां न केवलं यागार्थत्वम्। आरादुपकारकविषयेपि अपूर्वसाधनत्वेन रूपेण यागस्य उद्देश्यत्वम्। न तु स्वरूपमात्रेण यागस्य उद्देश्यत्वम्, वैयर्थ्यप्रसङ्गात्। न तु अपूर्वार्थत्वे समप्राधान्यं स्यात्, आरादुपकारकाणां तु यागादिनिष्ठापूर्वजननानुकूलयोग्यतासम्पादनात्।

यत्तु "व्रीहीन् प्रोक्षति" इत्यादौ व्रीहित्वावच्छिन्नोद्देशेनैव प्रोक्षणस्य विधानम्। तदनु शाब्दबोधोत्तरं निषादस्थपत्यधिकरणन्यायेन लक्षणया विनैव प्रोक्षणादिविशिष्टव्रीहीणामेव वाक्यान्तरकल्पनया अपूर्वार्थत्वकल्पनमित्युक्तम्, तत् लक्षणां विनैव वाक्यार्थसम्भवे लक्षणा न स्वीकार्या। यत्र प्रोक्षणेन प्रोक्षणजन्यादृष्टेन वा व्रीहीन् उत्पादयेत् इत्यर्थके "व्रीहीन् प्रोक्षति" इति विधौ अयोग्यतानिश्चयरूपात् प्रतिबन्धकात् लक्षणां विना शाब्दबोधः एव न भवति तत्र निषादस्थपत्यधिकरणसिद्धन्यायस्य प्रवृत्तिः न भवति। व्रीह्यादिपदेन अपूर्वसाधनत्वावच्छिन्नं लक्षयित्वा अपूर्वसाधनत्वावच्छिन्नोद्देशेन प्रोक्षणं विधीयते। एवं

च प्रोक्षणादिकम् अपूर्वप्रयुक्ताः इति श्यामाके अपि ऊहः सिद्धो भवति।

तदुपरि प्रश्नः, यथा "भिन्ने जुहोति" इत्यादिना भेदनादिनिमित्ते विहितः होमः अपि प्रधानं प्रति अङ्गं चेदपि भेदनाभावे तु भेदनहोमः न क्रियते तथा व्रीहित्वादिनिमित्ताभावे प्रोक्षणरूपनैमित्तिकस्यापि लोपः इति, तन्न, यत्, सप्तमी इत्यादिनिमित्तवाचकाभावेन व्रीहित्वादीनां निमित्तत्वं न सम्भवति। व्रीहित्वादिकं उद्देश्यतावच्छेदककोटौ न प्रविष्टमिति अनुष्ठापकत्वमपि न सम्भवति। अपूर्वस्यैव उद्देश्यतावच्छेदककोटौ प्रविष्टत्वात् निमित्तत्वम्।

वस्तुतस्तु फलेच्छा अनुष्ठानोत्पादिका। फलम् असिद्धमिति अनुष्ठापकं न भवति। एवं फलीभूतम् अपूर्वमपि असिद्धमिति न निमित्तम्। एवमेव प्रयाजाद्यारादुपकारकस्यापि अनुष्ठापकं न यागः, असिद्धत्वात्। एवं बाधकाभावात् ऊहः सिद्ध्यति।

**सन्दर्भः**

ऊहारम्भोऽथ सामोहो मन्त्रोहस्तत्प्रसङ्गतः। नवमाध्यायपादेषु चतुर्ष्वेते प्रकीर्तिताः।।

जैमिनीयन्यायमाला – उपोद्घातः, 21

अग्नये जुष्टं निर्वपामि - तै.सं.1.1.4

सूर्याय जुष्टं निर्वपामि - तै.सं.1.1.4 ऊहितः मन्त्रः

देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् अग्नये जुष्टं निर्वपामि - तै.सं.1.2.1

व्रीहीन् प्रोक्षति - तै. ब्र. 3.2.5.4

व्रीहीन् अवहन्ति -आप.1.21.7

भिन्ने जुहोति - शतपथब्राह्मणम् - 12.4.1.6

ऐन्द्रवारुणसावित्राः पुरोडाशाः – तै. ब्रा.1.8.6.3

भिन्ने जुहोति – श.ब्रा.12.4.1.6

व्रीहिभिर्यजेत – श.ब्रा.11.3.1.3

**सहायकग्रन्थसूची**

1 भाट्टदीपिका – खण्डदेवः – सद्गुरुप्रकाशनम्-देहली-1987

2 जैमिनीयन्यायमाला – माधवाचार्यः – चौखम्बा संस्कृत संस्थान-वाराणसी-1991

सहायकाचार्यः
धर्मशास्त्र-मीमांसाविभागः
संस्कृतविद्याधर्मविज्ञानसङ्कायः
काशीहिन्दूविश्वविद्यालयः, वाराणसी

❑ ❑ ❑

# वास्तुशास्त्रदृष्ट्या पर्यावरणविमर्शः

**डॉ. कृष्णकुमारभार्गवः**

**सारांशः -** वासयोग्यसंकल्पनायाःसिद्धान्तान् प्रतिपादयति वास्तुशास्त्रम् । शास्त्रेऽस्मिन् न केवलं गृहनिर्माणस्य अपितु प्रासाद-राजप्रासाद-नगर-जलाशयादि विषयाणां तथैव तेषाम् आसन्ने विद्यमानपर्यावरणस्य विषयेऽपि सिद्धान्ताः प्रतिपादिताः वर्तन्ते । यत्र अस्माभिः गृहनिर्माणं अथवा अन्यवास्तुसंबन्धिनिर्माणकार्यं क्रियते तस्य पर्यावरणस्य अपि विचारः करणीयः भवति यतोहि वास्तुशास्त्राधारेणनिर्मितगृहं भवतु तथापि तस्य परितः विद्यमानक्षेत्रस्य वातावरणं पर्यावरणं वा समीचीनं नैव भवति चेत् तत्र निवसतां जनानां कृते उत्तमफलं नैव प्राप्यते । वास्तुशास्त्रे कीदृशाः वृक्षाः शुभप्रदाः गृहस्य आसन्ने तथा वृक्षारोपणस्य शास्त्रीयं महत्वं कीदृशं भवति इत्येषां विषयाणां विचारः समीचीनतया कृतः अस्ति । अस्मिन् शोधपत्रे एते एव विषयाः विमृष्टाः ।

**मुख्यशब्दाः –** पञ्चमहाभूताः, प्राकृतिकशक्तयः, पर्यावरणम्, वृक्षः, दिक्, वृक्षचक्रम् ।

**प्रस्तावना -** वसन्ति प्राणिनो यत्र इति वास्तु अर्थात् प्राणिनां निवासस्थानं तेषां वास्तु भवति । यस्मिन् शास्त्रे पञ्चमहाभूतानां समन्वयः, प्राकृतिकशक्तीनां प्रबन्धनम्, आवासीय- व्यवसायिकधार्मिकक्रियाकलापानां सम्पादनाय भवननिर्माणार्थं सिद्धान्तानां विधिप्रविधिनां प्रतिपादनं क्रियते तस्य समग्रसंकलनं “वास्तुशास्त्रम्” कथ्यते । अर्थात् प्रकृतौ विद्यमानानां तत्वानां अस्माकं गृहे कथं सम्यक् सन्निवेशः स्यात् तस्मिन्नैव विषये प्रतिपादयति वास्तुशास्त्रम् । पर्यावरणम् इत्युक्ते परितः विद्यमानं यत् तत् पर्यावरणम् । अस्माकं गृहस्य समीपे अप्येकं पर्यावरणं भवति तत्र वृक्षाणां स्थितिः कथं भवेत् कीदृशाः वृक्षाः शुभदायकाः एतस्मिन् विषये प्रस्तुत शोधपत्रे विचारः क्रियते ।

**गृहसमीपे शुभाशुभवृक्षाः -** वास्तुशास्त्रम् एकं विशिष्टं शास्त्रम् अस्ति यतोहि शास्त्रेऽस्मिन् केवलम् गृहस्य आन्तरिकविषयाणाम् एव विचारः नैव क्रियते अपितु गृहस्य समीपे विद्यमानविषयाणामपि चिन्तनं क्रियते तेषु विषयेषु अन्यतमः विषयः भवति वृक्षविचारः । गृहस्य समीपे के के वृक्षाः शुभदायकाः तथैव गृहस्य समीपे विद्यमानमन्दिराणां विषये आचार्यसूत्रधारमण्डनः स्वकीयग्रन्थे वास्तुराजवल्लभे इत्थं निरूपयति यत् -

**वृक्षा क्षीरसकण्टकाश्च फलिनस्त्याज्या गृहाद्दूरतः**
**शस्ते चम्पकपाटले च कदली जाती तथा केतकी ।**
**यामादूर्ध्वमशेषवृक्षसुरजाच्छाया न शस्ता गृहे**
**पार्श्वे कस्य हरेरवीशपुरतो जैनानुचण्ड्याः क्वचित् ॥**[1]

गृहस्य समीपे दुग्धस्राविणः वृक्षाः, कण्टकिनः वृक्षाः, फलिनश्च वृक्षाः नैव शस्ताः । अतः गृहसमीपे तेषां रोपणं नैव कार्यम् । किन्तु चम्पकवृक्षः, पाटलवृक्षः, कदलीवृक्षः, जातीवृक्षः, केतकीवृक्षश्च गृहसमीपे शुभदाः भवन्ति । अतः गृहसमीपे तेषां वृक्षाणां रोपणं कार्यम् । यस्य कस्यापि वृक्षस्य छाया एकयामादधिककालपर्यन्तं (एकप्रहरादधिककालपर्यन्तं) गेहस्य उपरि निपतति चेत् शुभं नैव भवति । तथा ब्रह्म-विष्णु-सूर्य-शिवमन्दिराणां समीपे, जैनमन्दिरस्य पृष्ठभागे, देवीमन्दिरस्य समीपे च गेहनिर्माणम् अशुभदं भवति ।

**बृहत्संहितायां वास्तुविद्याध्याये निरूपितः वृक्षविचारः –** वास्तुशास्त्रस्य प्रमुखः ग्रन्थः भवति बृहत्संहिता । एतस्मिन् ग्रन्थे आचार्यवराहमिहिरेण इत्थं वृक्षविचारः निरूपितः -

**याम्यादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते ।**

---

[1] राजवल्लभवास्तुशास्त्रम् – प्रथमोऽध्यायः - श्लोकः 28

**उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्था ॥**
**आसन्नाः कण्टकिनो रिपुभयदाः क्षारिणोऽर्थनाशाय ।**
**फलिनः प्रजाक्षयकरा दारूण्यपि वर्जयेदेषाम् ॥**
**छिन्द्याद्यदि न तरूस्तांन् तदन्तरे पूजितान् वपेदन्यान् ।**
**पुन्नागाशोकारिष्टबकुलपनसान् शमीशालौ ॥**[1]

गृहात् याम्यादिषु दिक्षु जाताः प्लक्षवटोदुम्बराश्वत्थाः तरवः अशुभदाः भवन्ति। किन्तु एते एव तरवः प्रादक्षिण्येन उदगादिषु दिक्षु शुभदाः भवन्ति ।

अर्थात् गृहात् याम्यायां दिशि प्लक्षवृक्षः, पश्चिमायां दिशि वटवृक्षः, उत्तरस्यां दिशि उदुम्बरः, पूर्वस्यां दिशि अश्वत्थः अशुभदाः भवन्ति । तथा गृहात् उत्तरस्यां दिशि प्लक्षः, पूर्वस्यां दिशि वटवृक्षः, दक्षिणस्यां दिशि उदुम्बरवृक्षः, पश्चिमायां दिशि अश्वत्थवृक्षः शुभदाः भवन्ति।

यः वृक्षः यस्यां दिशि अशुभदः तस्मात् विरुद्धदिशि शुभदेत्यर्थः । यथा - वटवृक्षः पूर्वदिशि शुभदः, पश्चिमायामशुभदः। उदुम्बरः दक्षिणस्यां दिशि शुभदः, उत्तरदिशि अशुभदः । अश्वत्थः पश्चिमायां दिशि शुभदः, पूर्वदिशि अशुभदः। प्लक्षः उत्तरायां शुभदः, दक्षिणायामशुभदः ।

| दिक् | शुभवृक्षः | अशुभवृक्षः |
|---|---|---|
| पूर्वा | वटवृक्षः | अश्वत्थवृक्षः |
| दक्षिणा | उदुम्बरवृक्षः | प्लक्षवृक्षः |
| पश्चिमा | अश्वत्थवृक्षः | वटवृक्षः |
| उत्तरा | प्लक्षवृक्षः | उदुम्बरवृक्षः |

[1] बृहत्संहिता – वास्तुविद्याध्यायः – ८५ तः ८७ श्लोकाः

खदिरप्रभृतयः कण्टकिनः वृक्षाः गृहस्य निकटवर्तिनः भवन्ति चेत् रिपुभयं जनयन्ति। अर्कादयो क्षारिणः वृक्षाः गृहस्य आसन्नाः भवन्ति चेत् अर्थनाशाय भवन्ति। आम्रप्रभृतयः फलिनः वृक्षाः गृहस्य आसन्नाः भवन्ति चेत् प्रजाक्षयकराः भवन्ति। न केवलमेतेषां वृक्षाणां गृहासन्नत्वमशुभदम्; एतेषां वृक्षाणां दारूणि = काष्ठानि अपि वर्जयेत्। गृहेषु एतेषां वृक्षाणां दारूणामप्युपयोगः न कार्यः इत्यर्थः।

किन्तु यदि गृहस्य आसन्ने कण्टकीवृक्षाः, क्षारिणः वृक्षाः, फलिनः वृक्षाश्च भवन्ति तर्हि तेषां छेदनं न कुर्यात्। तदुत्थदोषपरिहारार्थं तेषां वृक्षाणाम् अन्तरे = मध्ये अन्यान् पूजितान् वृक्षान् वपेत्। के ते पूजिताः वृक्षाः इति आचार्यः कथयति - **"पुन्नागाशोकारिष्टकुलपनसान् शमीशालौ"** इति। पुन्नागवृक्षाः, अशोकवृक्षाः, अरिष्टवृक्षाः, बकुलवृक्षाः, पनसवृक्षाः, शमीवृक्षाः, शालवृक्षाः - एते पूजिताः वृक्षाः भवन्ति ।

**दिग्विभागेन वृक्षारोपणप्रकारः** –दिगनुसारेण वृक्षारोपणविषये वास्तुशास्त्रे प्रतिपादितमस्ति यत् -

**ईशाने रोपयेद्धात्री नैर्ऋत्ये चिञ्चिणीद्रुमान् ।**
**आग्नेय्यां दाडिमं चैव वायव्ये बिल्ववृक्षकम् ॥**
**प्लक्षोत्तरे पूर्ववटं प्रशस्तं ह्युदुम्बरं दक्षिणभागके च ।**
**अश्वत्थवृक्षं दिशि वारुणस्यां मध्ये तथाम्रान्विविधप्रकारान् ॥**[1]

अर्थात् क्षेत्रस्य ईशान्यकोणे धात्रीवृक्षाः रोपणीयाः। नैर्ऋत्यकोणे चिञ्चिणीद्रुमाः रोपणीयाः। आग्नेयकोणे दाडिमवृक्षाः रोपणीयाः। वायव्यकोणे बिल्ववृक्षाः रोपणीयाः। उत्तरदिशि प्लक्षवृक्षाः रोपणीयाः । पूर्वस्यां दिशि वटवृक्षाः रोपणीयाः । उदुम्बरवृक्षाः

---

[1] बृहद्वास्तुमाला – पशुगृहनिर्माणचरणिविचारः – २४श्लोकौ २५ ,

दक्षिणदिशि रोपणीयाः । पश्चिमदिशि अश्वत्थवृक्षाः रोपणीयाः । क्षेत्रस्य मध्यभागे विविधजातीनाम् आम्रवृक्षाणाम् आरोपणं करणीयम् ।

**क्षीरवृक्षा वटाश्वत्थरक्तपुष्पद्रुमास्तथा ।**
**सकण्टका शाल्मली प्लक्षोदुम्बरसंज्ञकौ ॥**
**ग्निकोणे सदा दुष्टा मृत्युपीडाप्रदायकाः ।**
**पुन्नागफलिनीनिम्बदाडिमाशोकजातिकाः ॥**
**नागकेशरसम्पुष्पजपाकुसुमकेसरे ।**
**जयन्ती चन्दनं प्रोक्तं वचा चैवापराजिता ॥**
**मधुबिल्वाम्रभृङ्गाश्च नागरङ्ककुपादिकाः ।**
**यत्र तत्र स्थिताश्चैते नारिकेलादयः शुभाः ॥**[1]

क्षीरवृक्षाः (दुग्धस्राविणः वृक्षाः), वटवृक्षाः, अश्वत्थवृक्षाः, रक्तपुष्पिणः वृक्षाः, कण्टकिनः तरवः, शाल्मलीद्रुमाः, प्लक्षवृक्षाः, उदुम्बरवृक्षाः च क्षेत्रस्य आग्नेयकोणे सर्वदा दुष्टाः = अशुभफलदाः तथा मृत्युपीडाप्रदायकाः भवन्ति । पुन्नागवृक्षाः, फलिनः वृक्षाः, निम्बवृक्षाः, दाडिमवृक्षाः, अशोकवृक्षाः, जातितरवः, नागकेशरवृक्षाः, सम्पुष्पवृक्षाः, जपावृक्षाः, केसरवृक्षाः, जयन्तीवृक्षाः, चन्दनवृक्षाः, वचावृक्षाः, अपराजितावृक्षाः, मधुवृक्षाः, बिल्ववृक्षाः, आम्रवृक्षाः, भृङ्गवृक्षाः, नागरवृक्षाः, ककुपादिकाः, नारिकेलादिवृक्षाश्च यत्र कुत्रापि दिशि स्थिताः चेदपि शुभफलदाः एव भवन्ति । अतः एते पादपाः सर्वत्र रोपणयोग्याः भवन्ति ।

**वृक्षारोपणफलम् -** वयं सर्वेऽपि जानीमः एव यद् सम्प्रति काले वृक्षाणां महत्वं कीदृशं वर्तते । पर्यावरणस्य यद् असन्तुलनं जायमानं विद्यते तत्र मुख्यकारणं वृक्षाणाम्

[1] वास्तुरत्नाकरः –गृहोपकरणप्रकरणम् – ३७ तः ४० श्लोकाः

अभावः अप्यस्ति अतः सम्प्रति काले सर्वकारः अपि वृक्षारोपणस्य कृते सर्वान् प्रेरयन अस्ति । परन्तु वृक्षाणां तथा वृक्षारोपणस्य महत्वं प्राचीनकाले एव अस्माकं ऋषि-महर्षयः आचार्याः च प्रतिपादितवन्तः । तत्र वृक्षारोपणस्य न केवलं भौतिकं महत्वं भवति अपितु आध्यात्मिकं महत्वम् अपि भवति यथा -

**अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दशचिञ्चिणीकम् ।**
**कपित्थबिल्वामलकत्रयञ्च पञ्चाम्रवापी नरकं न पशेत् ॥**[1]

यो नरः एकमश्वत्थवृक्षम्, एकं पिचुमन्दवृक्षम्, एकं न्यग्रोधवृक्षं, दश चिञ्चिणीवृक्षान्, त्रीन् कपित्थवृक्षान्, त्रीन् बिल्ववृक्षान्, त्रीन् आमलकवृक्षान्, पञ्च आम्रवृक्षान् च रोपयति सः मरणादूर्ध्वं नरकं नैव पश्यति ।

**वाटिकादिरोपणस्य माहात्म्यम् -** बृहत्संहितायां वृक्षायुर्वेदाध्याये वराहमिहिराचार्येण जलाशयानां प्रान्तेषु वृक्षवाटिकायाः निर्माणस्य आवश्यकता इत्थं प्रतिपादिता -

**प्रान्तच्छायाविनिर्मुक्ता न मनोज्ञा जलाशयाः ।**
**यस्मादतो जलप्रान्तेष्वारामान् विनिवेशयेत् ॥**[2]

आरामैः विना वापीकूपतडागादयः जलाशयाः प्रान्तच्छायाविनिर्मुक्ताः (पर्यन्तेषु छायया विरहिताः) भवन्ति तथा मनोज्ञाः = चित्ताह्लादकाः न भवन्ति । तस्मात् कारणात् जलप्रान्तेषु आरामान् = वृक्षवाटिकान् विनिवेशयेत् ।

बृहद्वास्तुमालायां जलाशयानां प्रान्तेषु वृक्षवाटिकायाः रोपणस्य माहात्म्यम् इत्थं प्रतिपादितम् -

---
[1] बृहद्वास्तुमाला २३श्लोकः – पशुगृहनिर्माणचरणिविचारः –
[2] बृहत्संहिता – वृक्षायुर्वेदाध्यायः – श्लोकः १

**वाटिका वा तडागो वा कूपो वा यदि निर्मितः ।**
**गृहात्पूर्वे कुबेर्यां च वारुणे शम्भुकोणके ॥**
**सदा सवित्री भविता सदा दानं प्रयच्छति ।**
**सदा यज्ञं च पूज्येत यो रोपयति पादपम् ॥**[1]

यदि वाटिका तडागः कूपो वा गृहात् पूर्वदिशि, उत्तरदिशि, पश्चिमदिशि, इशान्यकोणे वा निर्मितो भवति, तत्र अदि पादपानाम् (वृक्षाणाम्) आरोपणं क्रियते (अर्थाद्यदि वृक्षवाटिका निर्मीयते) तर्हि सर्वदा गायत्रीमन्त्रस्य जपकरणेन, सर्वदा सत्पात्रेभ्यः दानकरणेन, सर्वदा वेदोक्तयज्ञानां करणेन च यत्पुण्यफलं प्राप्यते तत्पुण्यफलं प्राप्यते। अतः वापीकूपतडागादीनां जलाशयानां प्रान्तेषु वृक्षवाटिकाः निर्मातव्याः ।

**वृक्षारोपणमुहूर्तः –** शुभकाले कृतं कार्यं शुभदायकं भवति तदर्थमेव ज्योतिष-वास्तुशास्त्रे विभन्नकार्याणां कृते शुभकालः मुहुर्तश्च उक्तः अस्ति। वृक्षारोपणं कदा कर्तव्यं इत्यपि शास्त्रेस्मिन् निगदितमस्ति तद्यथा -

**लतागुल्मवृक्षरोपो हस्तपुष्याश्विनीध्रुवैः ।**
**विशाखामृगमूलाह्ववारुणैश्च प्रशस्यते ॥**
**गुरौ केन्द्रे शुभे शुक्रे विधौ वारिणि वोदये ।**
**शुभयुक्तेक्षिते बन्धौ सद्वारे वा शुभोदये ॥**[2]

हस्तः, पुष्यः, अश्विनी, ध्रुवसंज्ञकनक्षत्राणि, विशाखा, मृगशिरः, मूलं, शतभिषा - एभिः नक्षत्रैः, यदा गुरुः केन्द्रे भवति, शुक्रश्च शुभस्थानस्थो भवति, चन्द्रः जलचरराशिस्थो भवति, बन्धुस्थाने = चतुर्थभावे शुभग्रहाणां योगः दृष्टिर्वा भवति

[1] बृहद्वास्तुमाला – पशुगृहनिर्माणचरणिविचारः – १५, १६ श्लोकौ
[2] बृहद्वास्तुमाला श्लोकौ ४३ ,४२ – पशुगृहनिर्माणचरणिविचारः –

तदानीं वृक्षाणामारोपणं प्रशस्तं भवति ।

**सोमवारयुते मूले चापलग्ने मतान् द्रुमान् ।**
**स्थापयेज्जीवलग्ने च रेवत्यां गुरुवासरे ॥**[1]

बृहस्पत्याचार्याणां मते वृक्षारोपणमुहूर्तः एवं भवति - "सोमवासरे यदा मूलनक्षत्रं भवति तदा धनुर्लग्ने द्रुमारोपणं शुभदं भवति । तथा गुरुवासरे रेवतीनक्षत्रं यदा भवति तदा गुरुलग्ने वृक्षाणामारोपणं शुभदायकं भवति ।"

**वृक्षचक्रम् -**

**सूर्यभाद्दिनभं यावद्वृक्षचक्रं विधीयते ।**
**त्रयं मूले भवेद्रोगस्त्वचि त्रीणि धनागमः ॥**
**वेदश्शाखासु नाशः स्यात्पत्रे युग्मं दरिद्रता ।**
**शीर्षे त्रीणि शुभं प्रोक्तं पूर्व एकन्तु मृत्युदम् ॥**
**सुतनाशं पञ्च याम्ये पश्चिमे द्वे धनप्रदे ।**
**साद्वेद उत्तरे लाभ इत्युक्तं शक्तियामले ॥**[2]

शक्तियामलानुसारं सूर्यनक्षत्रात् दिननक्षत्रपर्यन्तं गणनमेव वृक्षचक्रमित्यभिधीयते । अर्थात् यस्मिन् दिवसे वृक्षारोपणं क्रियते तस्मिन् दिवसे सूर्यस्य यद् नक्षत्रं भवति ततः वर्तमान दिनस्य नक्षत्रं (चन्द्रनक्षत्रम्) यावत् गणना क्रियते तद् आधारेण शुभाशुभफलं भवति तत् अधः तालिकाद्वारा अवगन्तुं शक्यते ।

| नक्षत्रम् | वृक्षे तन्नक्षत्रस्य स्थानम् | फलम् |
|---|---|---|
| 3 | मूलम् | रोगः |

[1] बृहद्वास्तुमाला ४४श्लोकः – पशुगृहनिर्माणचरणिविचारः –
[2] बृहद्वास्तुमाला –पशुगृहनिर्माणचरणिविचारः श्लोकाः ४७तः ४५ –

| | | |
|---|---|---|
| 3 | त्वचा | धनलाभः |
| 4 | शाखा | नाशः |
| 2 | पत्रम् | दारिद्र्यम् |
| 3 | शीर्षम् | शुभम् |
| 1 | पूर्वा | मृत्युः |
| 5 | दक्षिणा | पुत्रनाशः |
| 2 | पश्चिमा | धनदम् |
| 4 | उत्तरा | लाभः |

**उपसंहारः -** वास्तुशास्त्रं मानवानां कृते अत्युपकारकं शास्त्रमस्ति। वयं सर्वेऽपि जानीमः एव यत् मनुष्यस्य कृते उत्तमं जीवनं यापयितुं वासस्थानस्य आवश्यकता भवति । वास्तुशास्त्रं शास्त्रीयरीत्या किञ्च वैज्ञानिकरीत्या कथं समीचीनवासव्यवस्था भवेत् एतदर्थं सिद्धान्तान् निरूपयति । एतस्मिन् एव प्रसङ्गे वासस्थानस्य पर्यावरणस्य चिन्तनमपि सर्वैः क्रियते यतोहि गृहस्य निकटे विद्यमानपर्यावरणं यदि समीचीनं नैव भवति चेत् तस्मिन् गृहे विद्यमानजनानां कृते शुभफलं नैव प्राप्यते अतः एतस्य चिन्तनम् अति आवश्यकं भवति । एतस्मिन् महत्वपूर्णविषये प्रस्तुत शोधपत्रे बहवः विषयाः समालोचिताः। तेषु प्रमुखतया गृहसमीपे शुभाशुभवृक्षाः, बृहत्संहितायां वास्तुविद्याध्याये निरूपितः वृक्षविचारः, दिग्विभागेन वृक्षारोपणप्रकारः, वृक्षारोपणफलम्, वाटिकादिरोपणस्य माहात्म्यम्, वृक्षारोपणमुहूर्तः तत्रापि वृक्षचक्रमाध्यमेन नक्षत्रशुद्धिः इत्येषां विषये समालोचनं कृतम् । एतेषां विषयाणाम् आधारेण समीपे कीदृशवृक्षाणां रोपणं कदा च रोपणम् इति ज्ञातुं शक्यते ।

## सन्दर्भग्रन्थसूची –

1. मुहूर्तचिन्तामणिः; ग्रन्थकर्ता – रामदैवज्ञः, संस्करणवर्षम् – सा.यु. २०१५, प्रकाशनसंस्था – चौखम्बासुरभारतीप्रकाशनम्, वाराणसी
2. बृहत्संहिता – प्रथमो भागः ; ग्रन्थकर्ता – वराहमिहिरः, व्याख्याकारः – पं.अच्युतानन्दझा, संस्करणवर्षम् – सा.यु. २०१४, प्रकाशनसंस्था – चौखम्बाविद्याभवनम्, वाराणसी
3. बृहत्संहिता – द्वितीयो भागः ; ग्रन्थकर्ता – वराहमिहिरः, व्याख्याकारः – पं.अच्युतानन्दझा, संस्करणवर्षम्– सा.यु. २०१४, प्रकाशनसंस्था– चौखम्बाविद्याभवनम्, वाराणसी
4. मनुष्यालयचन्द्रिका; ग्रन्थकर्ता – श्रीनीलकण्ठमूसतः, द्वितीयसंस्करणम्, संस्करणवर्षम् – सा.यु. २०१३, प्रकाशनसंस्था – चौखम्बाकृष्णदासअकादमी, वाराणसी
5. वास्तुरत्नाकरः (अहिबलचक्रसहितः); ग्रन्थकर्ता – श्रीविन्ध्येश्वरीप्रसादद्विवेदी, एकादशतमसंस्करणम्,
संस्करणवर्षम् – सा.यु. २०१२, प्रकाशनसंस्था – चौखम्बासंस्कृतसीरीजआफीस्, वाराणसी
6. बृहद्वास्तुमाला; सम्पादकौ – डॉ ॥ ब्रह्मानन्दत्रिपाठी &डॉ ॥ रविशर्मा च, संस्करणम् – सा.यु. २०१६, प्रकाशनसंस्था – चौखम्बासुरभारतीप्रकाशनम्, वाराणसी
7. मयमतम्; ग्रन्थकर्ता – मयमुनिः, प्रकाशनवर्षम् – सा.यु. १९१९, महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन राजकीयमुद्रणालययन्त्रालये तदध्यक्षेण मुद्रयित्वा प्रकाशितम् ।

8. समराङ्गणसूत्रधारः; प्रकाशनवर्षम् – १९६५, प्रकाशनसंस्था – भारतभारतिप्रेस्, नवदेहली

डॉ. कृष्णकुमारभार्गवः
सहायकाचार्यः,ज्योतिषवास्तुविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
Email-astrokkbhargav@gmail.com, Mob No. 7987540490

❑❑❑

# महाभारतस्य आदिपर्वान्तर्गतशापाः मानवप्रवृत्तेः नियन्त्रणञ्च

**डा.एम्.के. सुनीथा**

## महाभारतम्

इदं प्रायः सर्वे भारतीयविद्वांसो मन्यन्ते यत् महाभारतं प्राग् जयनाम्ना ततो भारतनाम्ना ततः परतश्च महाभारतनाम्ना प्रसिद्धम् इति।

**नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।**
**देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्** ।। श्री भा.प्र.2.4

श्लोकोऽयं महाभारतस्य जयशब्दव्यवहार्यतामार। मौलिकं जयनाम्ना व्यवहृतञ्च, महाभारतमल्पपरिमाणं स्वरूपत ऐतिहासिककथाप्रधानञ्चावर्त्तत नोपदेशप्रधानम्। जय इति नामैव तस्य ग्रन्थस्य पाण्डवविजयमात्रबोधनाय निर्मितत्वमाह। अमुमेव जयनामानं ग्रन्थं व्यसो निजशिष्यं वैशम्पायनमध्यापयामासेति सा प्रथमावस्था महाभारतस्य।

प्रथमं महाभारतमितिहासः पुराणमाख्यानकञ्चेति नामभिराख्यायते स्म। साम्प्रतिकास्तु महाभारतम् आचारशास्त्रम्, नीतिशास्त्रम्, धर्मार्थकाममोक्षाख्यचतुर्वर्गसाधनम् चामनन्ति। भारतं **पञ्चमो वेदः** इति सर्वत्र प्रचारितम् । सर्वत्रास्मिन् ग्रन्थे वैष्णवसिद्धान्तानां प्रमुखत्वेन प्रतिपादनात् महाभारतं वैष्णवस्मृतिरप्याख्यायते। महाभारतस्य अशीतिप्रतिशतभागोऽनेकविधोपदेशमयः विंशतिप्रतिशतभाग एवेतिहासप्रतिपादक इति अस्य नीतिशास्त्रेषु गणनोचिता।

## शापनिर्वचनम्

**शप आक्रोशे** इति धातोः **हलश्च इति घञ्** प्रत्यये शापशब्द निष्पत्तिः। दूषणं अधिक्षेपणं विश्वासजननं शपनं इत्यादयस्तदर्थाः। शपनं नाम स्वापराधिनः दण्डनरूपेण

वचसा अनिष्टप्राप्त्याशंसनम्। धातोः आक्रोशार्थत्वात् शापे वाचः प्राधान्यम्, किन्तु तत्कामना प्रेरितायाः एव वाचः। अत एव अनिष्टार्थप्राप्ति वाचकानि सर्वाणि शापरूपं न भजन्ते। ज्येष्ठैः बालाः बहुधा निन्द्यमानाः दृश्यन्ते। निन्दावाक्येषु अतीव पारुष्यमपि भवति। हनन संहरणादिभावबोधकान्यपि वाक्यानि तत्रोपयुज्यन्ते। तथापि तेषां शापत्वं न तत्र वाङ्मात्रस्येव स्थितिः न भावस्य अन्यथा न कोपि बालः गृहे वर्धते। एवमेव परिहासार्धमपि समाजे अनिष्ठप्राप्तिबोधकानि वाक्यानि दृश्यन्ते। तत्रापि एषा एव स्थितिः। विशिष्य तत्र विपरीतलक्षणा अपि अनुकूलभावबाधिका भवति। कैश्चित् अप्रयत्नतः वाग्व्यवहारे मध्ये मध्ये अनिष्टार्थ बोधकानि पदानि उपयुज्यन्ते। एतादृशेषु सर्वेष्वपि स्थलेषु मनस्सङ्कल्पस्य अभावात् तानि वचनानि केवलं स्वीय क्रोधपरिहसनशीलकादिप्रदर्शकान्येव। पूर्णमनस्कता अत एव अवश्यमपेक्षते शापप्रवृत्तौ ।

शापस्यार्थं Cambridge international dictionary एवं निर्दिशति - 'Curse is a word or expression which is not polite and shows that you are very angry with something or someone. अत्र निष्ठुरोक्तिरेव शापः इत्यर्थः द्योत्यते। परन्तु - A word or a sentence asking a magical power to curse something unpleasant to happen to something or someone इत्यत्र मन्त्रशक्तेरभावे केवलनिष्ठुरोक्ति शापत्त्वं न प्रसज्यते इत्यवगन्तव्यम्।

मनस्सङ्कल्पमात्रेणापि वाग्व्यवहाराऽभावे शाप प्रसक्तिर्न। अन्यथा प्रायशः लोके सर्वोऽपि शप्ताः एव भवेयुः। स्वप्रतिकूलतया स्वीकृतानां जनानां विषये मानवमनस्सु तेषां अनिष्टकामनारूपाः भावाः बहवो जायन्ते। तथापि ते जलबुद्बुदा इव पुनः तत्रैव लीयन्ते। अतः शापप्रवृत्तिविषये भावनायाः भाषायाश्च समं प्राधान्यम्।

क्वचित् तेन भावनामात्रेण महतां विषये शापप्रसक्तिः दृश्यते। किन्तु तस्याः सार्वजनिकत्वेन, सार्वकालिकत्वेन वा स्वीकरणं नैव उपपद्यते। तपसा सन्तुष्टाः देवताः यथा वरान् ददति तथा दोषेण कुपिताः शापान् ददति।

आशीर्वचनानि अपि लोके बहुधा प्रवृत्तानि। तद्विषये यावती फलप्राप्तिः तावत्येव अधिक्षेपनरूपा निन्दावचनेष्वपि। **"शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा।"** इति वाल्मीकेः वचनमनुश्रृत्यापि शोकार्तस्य वाक् या यथार्थरूपं भजते कार्यरूपं प्राप्नोति वज्ररूपा सा एव वाक् शापः इति वक्तुं शक्यते। A Curse on blessing is a wish expressed in words that evil or good maybe fall a certain person.' इति वाक्यं महर्षेः अभिप्रायं अनुसरति। कोदण्डरामय्य अपि शापविषये अमुमेव अभिप्रायं द्योतयति। एषा स्थितिः विशेषतो ऋषीणाम् । वराणां शापानां वा विषये।

**शापाधिकारी**

शापे अधिकारी कः? इत्यपि विचारणीयम्। कोऽपि शपनीयः अनर्थकारी इति भावे मनसि जातेऽपि सर्वेऽपि शप्तुं न प्रभवन्ति। यथा पूर्णः तटाकः परीवाहतः जलानि बहिर्गमयितुं समर्थो भवति तथा परिपूर्णमेव मनः आत्मनः शापान् वा वरान् वा धातुं समर्थः भवति। अपरिपूर्णे मनसि भावसञ्चयस्येव प्राधान्यं भवति न तु भावनिर्गमनस्य। अत एव आक्रोशाधिक्षेपवचनदूषणपरुषवाग्भाषणादिकं शापस्वरूपं न लभते। तत्र केवलं स्वगतस्य असहनस्य बहिर्निर्गमनमेव प्रयोजनम् ।

पूर्णेन मनसा सह तपसा साधनीया शक्तिः शापदातुः सामर्थ्यं प्रमापयति। तपश्शब्दः ऋषिभिः बहुधा व्याख्यातः विश्लिष्टश्च। [1]**भगवद्गीतायां** व्यासः विविधानि

[1] गीता-

तपस्वरूपाणि प्रदर्शयति। येन यत्करणीयं तेन तस्मिन् सर्वात्मना **अनुरक्तत्वं फलानुगुणम् आचरणञ्च तपश्शब्देन स्वीकरणीयम्**। अत एव **स्वाध्यायप्रवचने एव अनुष्ठेय** इति तदेव तपः इति [1]**तैत्तरीयोपनिषदि मौद्गल्यस्य** मतं प्रदर्शितम्। तस्य शमदमादीनाम् अनुष्ठानेऽपि तैस्सह स्वाध्यायप्रवचने अवश्यम् अनुष्ठेयम् इति अन्येषामपि मतम्। अतः **येन यत्करणीयं तस्य यथा धर्मं करणमेव तपः**। तेन पुरुषः ब्रह्मविद् भवति। परञ्च आप्नोति। तथा तपसि वर्तमानस्य शक्तिः अनवधिका। तादृशशक्तिसञ्चयनेन पुरुषः महान् भवति। शापदानेन तपोव्ययः भवति। अत एव बहवो महर्षयः विश्वामित्रादयः शापदाने समर्थाऽपि स्वाभिलषितकर्मणि अन्येषां साहाय्यं स्वीकृतवन्तः। शक्तिसम्पन्नस्य पुरुषस्य मनः अपि निर्मलं भवति। निर्मलमनः पुरुषः न केवलं शप्तुम्, अपि तु शापं निवर्तयितुमपि समर्थो भवति। उत्तङ्केन शापं निवर्तयितुं प्रार्थितस्य पौष्यस्य वचनमत्र अनुसन्धेयम्।

**नवनीतं हृदयं ब्राह्मणस्य वाचि क्षुरो निहितस्तीक्ष्णधारः।**
**तदुभयमेतद् विपरीतं क्षत्रियस्य वाङ् नवनीतं हृदयं तीक्ष्णधारम्**[2] ।। इति।

वाचि संयमोऽपि उक्तस्य वचनस्य फलं परिपूर्णतः ददाति। यदा ज्ञानवृद्धिः तदा विषयसंशयराहित्यं तेन च वाचि संयमः सञ्जायते। वेदितव्यस्य वेदनानन्तरं ज्ञानी मुनिर्भवति। अत एव तैत्तरीयोपनिषदि वारुणिः **आनन्दो ब्रह्मा** इति ज्ञानं लब्ध्वा पुनः तद्वक्तुं पितृसमीपं न गच्छति। ततः पूर्वं क्रमशः अन्न, प्राण,मनो, ज्ञानानि ब्रह्मत्वेन ज्ञात्वा अनुपदमेव पितृसमीपं गत्वा तत् वदति। पिता पुनः **'तपसा ब्रह्म विजिज्ञासस्व**[3]**'**

---

[1] तैत्तिरीयोपनिषत् 3.6

[2] म.भा.1.3.123

[3] तैत्तिरीयोपनिषत् 3.5

इति तं पुनः प्रेषयति। आनन्द एव ब्रह्म इति ज्ञानानन्तरं सः पितृसमीपं नयति। मौनेन स्वकर्मणि प्रवृत्तो भवति। एतादृशेषु मुनिषु परिपूर्णा तपःशक्तिः वाङ्नियमेन पुनः पवित्रीकृता वचसां बलं वर्धयति तादृशाः प्रायः शप्तुम् अपि नोद्युक्ता भवन्ति। यदि ते शपन्ति सद्यः तत्क्रियारूपं भजति। अतश्शापाधिकारी अवश्यं सत्यवाक् भवेत्।

वाक् संयमेन सह सत्यवाक्त्वमपि शापस्याधिकारिणः प्रधानलक्ष्यम्। आर्षविज्ञाने सत्यस्यैव प्रथमं स्थानं, शिष्यं प्रति आचार्यस्य उपदेशेऽपि [1]**सत्यं वद** इत्येव प्रथमं वाक्यम्।

**अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।**
**अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते[2] ।।**
**नास्ति सत्यसमोधर्मः न सत्यात् विद्यते परम् ।**
**न हि तीव्रतरं किञ्चित् अनृतात् इह विद्यते** [3]।।

इत्थं शकुन्तलायाः **सत्यभाषिणीत्वादेव** अशरीरिणी दिव्यवाणी अपि शकुन्तलापक्षमेव स्वीकृतवती। सत्यभाषित्वाऽभावे वाङ्मनसोः असमन्वयः अनुचितान्वयो वा भवति । तादृशस्य शापदाने अधिकार एव न भवति । वाङ्मनसोः तुलनायामेव वाचः क्रिया कारणे साफल्यम् ।

**शापकारणानि -**

मानवस्य विविधविषयानुभावात् तेषु तेषु सुखदुःखप्रतीतिः भवति, तदनु सुखे मोहः दुःखे द्वेषश्च सर्वसाधारणौ। सुखप्राप्तौ दुःखनिवृत्तौ च यत्नवान् मानवः

---

[1] तैत्तिरीयोपनिषत् 1

[2] महा.आदि. 74.103

[3] महा. आदि. 74.105

तत्प्रतिबन्धकेषु द्वेषं भजते। वैचक्षण्यरहितानां साधारणतया एते रागादयः अन्तश्शत्रवः भूत्वा अभ्युदयनिःश्रेयसप्राप्तौ प्रतिबन्धकाः भवन्ति। तानेव वर्गीकृत्य षडिति व्यवहरन्ति- **"काम‌क्रोधलोभमोहमदमात्सर्यादिना रजस्तमोगुण प्रभावान्** दार्शनिकाः। इयञ्च स्थूला परिगणना। न केवलं रजस्तमप्रकृतयः एव शत्रवः, कामादयः प्रत्युत क्वचित् सत्वप्रकृतयः अपि शत्रवः भवन्तीति भागवतोक्तिः -

**रागो द्वेषश्च लोभश्च शोकमोहो भयं मदाः ।**
**मानोऽवमानोऽसूया च माया हिंसा च मत्सराः।।**
**रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः ।**
**रजस्तमप्रकृतयः सत्वप्रकृतयश्च क्वचित्[1]।। इति ।**

उपरि निर्दिष्टाः सर्वेऽपि मानवस्य अभ्युदयनिःश्रेयसप्राप्तौ प्रतिबन्धका एव। रजस्तमोप्रभावप्रभूतैः उपर्युक्तैः भावोद्वेगैः अभिभूतो यः कोऽपि शापार्ह एव भवति इति अवगम्यते। जयविजयावपि श्रीमहाविष्णोः पार्श्वदौ नास्मात् विविक्तौ इति पर्यालोचयतां देवगान्धर्वयक्षराक्षसमानवेषु न कोऽपि एतस्मात् अतिरिक्ताः।

परां कोटिं गता आत्माभिमानिता अपि क्लेशान् जनयति। सर्वेऽपि प्राणिनः प्रायशः आत्ममानिन एव। किन्तु देशकालौ परिज्ञाय केचित् प्रवर्तन्तते। केचित् पुनः तदभिज्ञाय बोध्यमाना अपि अनवगच्छन्तः आत्मसदृशानां अभिमानिनां पुरतः तत्प्रदर्शयन्तः आत्मनः क्लेशकूपे पातयन्ति । **शक्तिकल्माषपादयोर्मध्ये सम्पन्ना विचित्रा सङ्घटना शक्तेः आत्माभिमानिताकारणेन तं शप्तम् अकरोत् ।**

धर्मप्रस्तावनं कृत्वा त्वमेव अपसर इति राजानमुक्तवान्। उभावपि अपसर्तुं

[1] भाग.15.43, 44

नाङ्गीचक्रतुः। धर्ममार्गमनुसरन् शक्तिः, मानक्रोधमार्गमनुसरञ्च कल्माषपादः तथैव तिष्ठति स्म। कल्माषपादः **कशया** राक्षसवत् शक्तिं **जघान**। तदसहमानः शक्तिः **'पुरुषादः** भव" इति कल्माषपादं शशाप। तेन सः राक्षसो बभूव। अत्र सन्निवेशे कल्माषपादस्य आत्ममानिता तं शापोपहतिपर्यन्तं नीतवती। वस्तुतस्तु तत्र कारणं स्वल्पमेव। एकायनगते मार्गे अवश्यम् एकेन अपसर्तव्यमेव। शक्तिः धर्मदृष्ट्या प्रावर्तत। तयोः **विवदतोरेव** कल्माषपादः पौरोभाग्येन शक्तिं जघान। तस्याः अतिमानितायाः फलं शापप्राप्तिः ।

**श्रृङ्गिणा परीक्षित् कृते दत्तः शापः -**

महाभारते राजा परीक्षित् मृगयां गत्वा तत्र तपति शमीके महर्षौ कुपितः मृतं सर्पं तस्य ग्रीवायां पातयामास । शमीकपुत्रः श्रृङ्गी तदालोक्य अमर्षवशमापन्नः। सप्तभिः दिनैः एव तक्षकदष्टः स मृतो भवतु इति तं शशाप ।

**राज्ञा परिक्षिता कोपादशपन्तमहं नृपम् ।**
**यथार्हति स एवोग्रं शापं कुरु कुलाधमः ।**
**सप्तमेऽहनि तं पापं तक्षकः पन्नगोत्तमः**[1]**।।**

अत्र परीक्षितः चेष्टा श्रृङ्गौ अमर्षं जनयामास। सर्वा चेष्टाः सपद्येव फलं न दर्शयन्ति इत्यस्यापि इदमेव उदाहरणं भवति। पश्चात् शमीक एव स्वपुत्रदत्तं शापं ज्ञात्वा खिन्नः स्वशिष्यमेव परीक्षित्समीपं प्रेषयित्वा शापवृत्तान्तं निवेद्य यथोचितं कर्तुं सूचयति। एका एव चेष्टा परीक्षिता कृता। पुत्रे पितरि च विभिन्नस्पन्दने जनयामास।

महाभारते एव सहस्रपात् इति नामकस्य मुनेः चेष्टा एवमेव

---

[1] आदि. 41.18

विपरीतफलदायिनी बभूव । सहस्रपातः खगमो नाम **तपोबलसमन्वितः** द्विजः सखा आसीत्। सहस्रपात् तृणेन एकं भुजङ्गमं कृत्वा क्रीडावशेन खगमस्य अग्निहोत्रे पातयामास। भीषणार्थं कृतया तया चेष्टया खगमः प्रमुमोह पुनः संज्ञां लब्ध्वा सः कोपेन मित्रस्यापि चेष्टां असहमानः तमेवं शशाप ।

**यथा वीर्यस्त्वया सर्पः कृतोऽयं मद्विभीषया ।**
**तथा वीर्यो भुजङ्गस्त्वं मम शापाद् भविष्यसि** [1]।।

विनोदार्थं चेष्टित्वा सहस्रपात् मित्रेण शप्तः। विनोदाय अपि कृताः चेष्टाः यदार्थचेष्टा सममेव फलमुपकल्पयन्तीति अत्र निरूप्यते।

इत्थं परिशील्यमाणे स्वभावैः संसक्तं मनः, भावाविष्करणस्य अन्यतरोपायरूपा वाक्, भावानां वाचां वा अनुकरणरूपा चेष्टा इत्येताः तिस्रः श्रोतृषु प्रेक्षकेषु वा विभिन्नानि स्पन्दनानि कल्पयन्त्यः क्वचित् अमर्षमपि जनयन्ति। अमर्षस्थितिविशेषमनुश्रुत्य प्रतिक्रिया भवति। अमर्षे स्वल्पे मनागिव अस्वस्थभावना। तीव्रे प्रतिक्रियापर्यालोचनम्। तीव्रतरे वचसा अधिक्षेपनम् । तीव्रतमे शापदानं वा चेष्टाभिस्समाधानं वा इति प्रतिक्रिया स्वरूपम् । अतः तीव्रतरस्य असहनस्य बहिराविष्करणस्वरूपमेव शाप इति । विस्तृतगत्या निर्णेतुं शक्यते ।

**शुक्राचार्यः ययातिं शशाप -**

**क्रुद्धेनोशनसा शप्तो ययाति नाहुषस्तदा ।**
**पूर्वं वयः परित्यज्य जरां सद्योऽन्वपद्यता** [2]।।

इति शुक्राचार्यः ययातिं वृद्धो शशाप तेन प्रार्थितः शुक्रः यदि इच्छसि अन्यस्मिन् जरां

---

[1] आदि. 11.4

[2] आदि. 83.37

संक्रामय इति मार्गान्तरं सूचितवान् । ययातिः गृहमागत्य स्वकीयं ज्येष्टं पुत्रं यदुम् आहूय -

**त्वं यदो प्रतिपद्यस्व आत्मानं जरया सह ।**
**यौवनेन तदीयेन चरेयं विषयानहम्[1] ।।**

इति पृष्टवान् । किन्तु यदुः ताम् अभ्यर्थनां तिरश्चकार । इत्थमुवाच च -

**असक्तः कार्यकरणे परिभूतः सयोक्तैः ।**
**सहोपजीविभिश्चैव तां जरां नाभिकामये [2] ।।**

तेन कुपितः ययातिः यदुं शशाप। अत्र ययातः स्वप्रयोजनपरता तया समुत्पन्नम् अवगाहनाराहित्यं च स्पष्टम्। येन कारणेन सः वार्धक्यम् अन्यस्मै दत्वा यौवनं स्वीकर्तुं ततः अभिललाष । तदेव कारणं तत्पुत्रः यदुरपि उक्तवान्। आत्मवत् सर्वभूतानि इति ज्ञानं तदानीं तस्य नासीत् । अतः अनपराधिनमपि यदुं सः शप्तवान् । तत्र अवगाहनाराहित्यमेव असहनस्य प्रेरकं बभूव। प्रायसः अभिलषितस्य अप्राप्तिः अनभिलषिते तत् सङ्क्रान्तिः स्थितिर्वा असहनहेतुर्भवति। तदन्तःपातीनि स्वल्पस्वल्पतर, स्वल्पतमकारणानि भवन्ति । शापदातुः पक्षतः एतत्सर्वं परिशीलनम्।

शप्तपक्षतः अपि केचिद् विशेषाः परिगणनीया भवन्ति । आत्माभिमानिता । अश्रद्धा, अत्यासक्तिः, अलक्ष्यता, इत्यादीनि शप्तपक्षतः परिशीलने शापदातरि असहनप्रयोजकानि वा वर्धकानि वा भवन्ति विस्तरतः परिशीलयामः ।

**'श्रद्धया देयम्, अश्रद्धया अदेयम्, श्रिया देयम् भिया देयम्, संविदा देयम्' तै.उ.11.3 इति । क्रियमाणं कर्म, दीयमानं दानं वा, श्रद्धा सहितं स्यात् । श्रद्धालोपे फललोपः**

---

[1] आदि. 84.3

[2] आदि. 84.7

**क्वचित् विपरीतफलप्राप्तिश्च ।**

**उत्तङ्केन पौष्यायदत्तो शापः** -

उत्तङ्कः गुर्वर्थं कुण्डले याचमानः पौष्यनरपालस्य समीपं जगाम । पौष्यपत्नेः कुण्डले स्वीकृत्य उत्तङ्कः पौष्येण एवमुक्तः । **भगवन् चिरेण पात्रमासाध्यते भवाँश्च गुणवान् अथितिः। तदिच्छे श्राद्धं कर्तुं क्रियतां क्षण इति' ।। तमुत्तङ्कः प्रत्युवाच कृतक्षण एवास्मि शीघ्रमिच्छामि । यथोपपन्नममुपस्कृतं भवतेति स तथेत्युक्त्वा यथोपपन्नेनान्नेनैनं भोजयामास।। उत्तङ्कः सकेशं शीतमन्नं दृष्ट्वा अशुच्येतदिति मत्वा तं पौष्यमुवाच।**

यस्मान्मे अशुच्यन्नं ददासि **तस्मादन्धो भविष्यसीति**[1] उत्तङ्कः अनुमेने। पौष्यः तं भोजयामास तत्र उत्तङ्कः सकेशं शीतम् अन्नं ददर्श। तत् अशुचिरिति सम्भावयामास। तेन कुपितः यस्मात् मे अशुच्यन्नं ददासि तस्मादन्धो भविष्यसि इति पौष्यं शशाप। उत्तङ्काय प्रतिशापं दत्वा तेन प्रार्थितः पौष्यः अन्नं परिशील्य तस्य अशुचित्वं निश्चितवान्। तदा उत्तङ्क क्षमां याचितवान्। अत्र उत्तङ्कतः शापस्वीकारे पौष्यस्य **'अश्रद्धा'** एव कारणम्। विशेषतः यस्मिन् क्षणे सः श्राद्धं कर्तुम् उद्युक्तः । परिशीलनात् प्रागेव प्रतिशापदानं तस्य साहसञ्च निरूपयति। अत एव तेन पौष्येण शापे अनुवर्तितेऽपि उत्तङ्कः शापस्य सकारणत्वात् प्रतिशापस्य अवकाश एव नास्तीति पौष्यं निरुच्य एव गच्छति। अतः अत्र पौष्यपक्षतः अश्रद्धा उत्तङ्के असहनं कल्पयित्वा शापावकाशं ददौ।

शप्ते जागरूकः प्रमादः शप्तरि असहनम् अविद्यमानं कल्पयति विद्यमाने च वर्धयति। प्रमादः सर्वदा नष्टकारी एव। अन्यसम्बन्धाभावेऽपि स्वस्यैव पीडाः कल्पयति

---

[1] आदि. 3.115-117

प्रमादः। अभिज्ञानशाकुन्तले अयमेव प्रमादः शकुन्तलाजीवनं विषादप्रायमकरोत्। पश्यन्तु —

गान्धर्वविधिना दुष्यन्तं परिणीय तस्मिन् दुष्यन्ते अङ्गुलीयकं दत्वा नगरं गते शकुन्तला स्वपित्रा अतिथिसत्कारे नियुक्ता द्वारसमीपे एव स्थिता आगतं आगतोऽहमिति वदंतं च दुर्वासमुनिं न लक्षितवती । तावती तत्र तस्याः असावधानता । तेन कुपितः दुर्वासाः -

**विचिन्तयन्ती यमनन्**यमानसा
**तपोनिधिं वेत्सि न मामुपस्थितम् ।**
**स्मरिष्यति त्वां न स बोधितोऽपि सन्**
**कथां प्रमत्तः प्रथमं कृतामिव**[1] ।।' इति ।

शकुन्तलां शप्तवान्। दुष्यन्ते निरूढावदाना शकुन्तला विशिष्य अथितिसेवायामेव नियुक्ता विषयान्तरे प्रमत्ता बभूव । अत एव दुष्यन्तः त्वां न स्मरतु इति तेन मुनिना शप्ता ।

Guest Faculty,
Directorate of Distance Education
N.S.University, Tirupati.

❑❑❑

[1] अभि. शा.४.१

महस्विनी – विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452)
**कुसुमम् :** अगस्त - डिसेम्बर २०२२ **सम्पुटम् :** द्वितीयम्

# महाभारतोक्तः त्रिपुरसंहारकथायाः सन्देशः

**डा. जे.बि.चक्रवर्थी**

"मा कुर्यान्निष्फल कर्म" इति सत्पुरुषाः वदन्ति।धर्मार्थकाममोक्षरूपेषु चतुर्षु पुरुषार्थेषु क्रियमाणेन कर्मणा यत्किञ्चित् प्रयोजनं दृष्टं चेत् तदेव करणीयम्। आयुषः अनित्यत्वात् अल्पत्वात् च जन्मनः साफल्यसम्पत्तये प्रतिक्षणं सद्विनियोगः करणीयः। एवं सति निष्प्रयोजनैः कथालापैः सम्भाव्यैः असम्भाव्यैः वा किं प्रयोजनमिति प्रश्नो भवत्येव जीवित साफल्यसम्पादनाय पुरुषार्थसाधनाय च इतिहासपुराणानि उपकारकाण्येव। तेषु दृष्टेषु उपाख्यानेषु श्रवणमनननिदिध्यासनैः किमपि अदृष्टं भवत्येव। पुण्यकथा श्रवणेन भगवति भक्तिः लभ्यते अपि च प्रत्यक्षं परोक्षं वा हितं उपदिष्टं भवत्येव। महाभारते एवं हितसम्पादकानि बहूनि उपाख्यानानि वर्तन्ते विशेषतः शान्त्यानुशासनिकपर्वणोः उपाख्यानानि जीवितसाफल्यसम्पादकानि। इतरेषु पर्वसु दृष्टान्यपि उपाख्यानानि अपि तद्विधान्येव। एवं त्रिपुरोपाख्यानेनापि लौकिकः मोक्षविषयकश्च कञ्चन सन्देशः अन्तर्भावितः दृष्ट एव।

## कुलविवक्षानिराकरणम्

महाभारते लौकिक आध्यात्मिकश्च कश्चनसन्देशः अन्तर्भूतः प्रतिभाति। आदिपर्वणिअस्त्रविद्याभ्यासकालेजातिकृतो विवादः तीव्रतरः वर्णितः कर्णः सूतपुत्रः इतिप्रसिद्धः शल्यः तावत् क्षत्रियः। शूद्रस्य कर्णस्य चतुर्थवर्णेजातस्य द्वितीयवर्णे जातः

क्षत्रियः शल्यः कथं सारथिःभविष्यतीति शङ्का कर्णपर्वणि शल्येनैव उत्थापिता। आदिपर्वणिकर्णो न राज्यार्हः क्षत्रियकर्माणि न योज्यः इति भीमःकर्णमाक्षिपति।

**अङ्गराज्यं न युक्तं ते उपभोक्तुं नराधम।**
**श्वा हुताश समीपस्थं पुरोडाशमिवाध्वरे॥**[1]

ततः दुर्योधनः व्यक्तिविषये सामर्थ्यमेव गणनीयं जातिः कार्यनिर्वहणे न कारणमिति कर्ण समर्थितवान्।

**आग्नेयः कृत्तिका पुत्रः रौद्रो गाङ्गेय इत्यपि।**
**श्रुयते भगवान्देवः सर्वगुह्यमयो गुहः।।**[2]

तदा स्वयं दुर्योधनः कर्णाय अङ्गराज्यं दत्त्वा राजानमकरोत्। आदिपर्वणि या कुलविवक्षा पुनः सैव शल्येन कर्णपर्वणि उत्थापिता।

**न क्षत्रियो वै सुतानां श्रृणुयाञ्च कथञ्चन।**
**अहं मूर्धाभिषिक्तो हि राजर्षिकुलजो नृपः।**
**महरथः समाख्यातः सेव्यः स्तुत्यश्चबंदितान्।**
**सोऽहमेतादृशो भूत्वा नेहारिबलसूदनः।**
**सूतपुत्रस्य संग्रामे सारथ्यं कर्तुमुत्सहे॥**[3]

---

[1]महाभारतम् – आदिपर्वणि, 137.7 श्लोकः, पृ.239
[2]महाभारतम् – आदिपर्वणि, श्लो. 137.13, पृ-239
[3]महाभारतम् – कर्णपर्व – ३२/४९,५० श्लोकौ, पृ.सं – ५३।

एवं विधा कुलविवक्षा त्रिपुरासुरसंहारोपाख्यानकथनेन महर्षिणा निराकृता भवति इति वक्तुं शक्यते।

पुराणव्यवहारेण ईश्वरः अमङ्गलाभ्यासरतः पितृवनवासी एवं विधोपि त्रिपुराणि दग्धुं स एव समर्थःइति ब्रह्मा निश्चिकाय। अपिच देवानां मध्ये यद्यपि कुलकृतो व्यवहारः नास्ति तथापि ब्रह्मा सर्वेषां जातीनाम् उत्पत्तिस्थानमिति अग्रगण्यः। कर्मणापि ब्रह्मण्यः तथाविधो ब्रह्मा ईश्वरस्य सारथ्यं चकार इति वर्णनेन त्वयापि कर्णविषये कुलं न गणनीयमिति दुर्योधनः शल्यमुक्तवान्। एवं कार्यनिर्वहणे तारतम्यमपि न गणनीयम्। यस्तु कार्यसाधकः इतरे ततोऽधिकाः अपि तस्य सहायकाः एव भवेयुः इति सन्देशोऽपि अत्र सूचितः। पुराणां संहर्ता रुद्रःएवेति निश्चयः सः यथा रथं चोदयितुं निर्दिशति तथैव सारथिना रथः चोदनीयः। एवं कथनेन समाजहिताय कार्यसाधनेन न्यूनाधिकभेदं विस्मृत्य सर्वैः ऐकमत्येन भाव्यमितिलौकिकः सन्देशः त्रिपुरदाह वृत्तान्तात् अवगन्तव्यः। ब्रह्मणः वाक्येषु अपि एष विषयः स्पष्टीकृतः।

**नात्र किञ्चिन्मृषा वाक्यं यदुक्तं त्रिदिवौकसः।**
**संयच्छामि हयानेष युध्यतो वै कपर्दिनः॥**[1]

## वृत्तिगौरवम्

क्रियमाणे कर्मणि गौरवातिशयः दर्शनीयः तच्च कर्म लोकक्षेमङ्करं चेत् विशेषतः आत्मनि कुलादि अभिमानारोपः न कार्यः।**श्रमे गौरवम्** इति पाश्चात्याः अपि

---

[1]महाभारतम् – कर्णपर्व – ३५/७५ श्लोकः, पृ.सं – ५९।

इममङ्गीकुर्वन्ति (Dignity of Labour) (डिग्निटी आफ् लेबर्)। शत्रुसंहारे करणीये देवहितरूपे क्षेमे सम्पद्यमाने उपस्थितेषु साधनेषु आभिजात्यादिकारणैः विघ्नकरणं न युक्तमिति अस्मादुपाख्यानात् स्पष्टम्।रथिकः श्रेष्ठोपि स्वयं रथं चोदयितुं न प्रभवति। योद्धापि सारथिना विना विफलो भवति। अतः सारथेः स्थितावेव रथिकस्यापि गौरवं भवत्येव इत्यनेन यस्मिन् कर्मणि यो निपुणः स एव तत्कर्मकर्तुं प्रभवतीति, कर्मकारः नैपुण्यातिशयेन मान्य:इति सन्देशोपि अत्र गम्यते।

**कवचानि सशस्त्राणि कार्मुकं च पितामह।**
**त्वामृते सारथिं तत्र नान्यं पश्यामहे वयम्॥**
**त्वं हि सर्वगुणैर्युक्तो दैवतेभ्योऽधिकः प्रभो।**
**स रथं तूर्णमारुह्य संयच्छ परमान् हयान्॥**[1]

**आध्यात्मिकसन्देशः**

आध्यात्मिक सन्देशोपि मोक्षविषयकः अस्मिन् उपाख्याने अन्तर्भूतः।पुरं = शरीरं, तच्च त्रिगुणात्मकं भवति। शरीरेण आकारः गुणैः मनः प्रवृत्तिश्च भवति। लोहत्रये श्रेष्ठतरो लोहः सुवर्णं सत्वगुणप्रतिनिधिः, रजतं मध्यमं रजोगुणस्य तमः कृष्णवर्णम्अयस्मयेन पुरेण प्रतिनिधी कृतम्। एवं गुणत्रयं यदा नष्टं भवति तदैव मोक्षः भवति। गुणसाम्ये न मोक्षः सिद्धेपि साम्ये गुणनाशेन विना मोक्षसिद्धिः न भवति। आमा- रथी, शरीरं-रथं, बुद्धिः-सारथिः, मनः-प्रग्रहः इत्यादि युद्धसामग्री गोक्षप्राप्तये

---

[1]महाभारतम् – कर्णपर्व – ३४/७२,७३ श्लोकौ, पृ.सं – ५९।

महाभारते भगवद्गीतासु एव वर्णिता उपनिषत्सु गृहीता च। विशेषतः कठोपनिषदि तृतीयवल्यां आत्मनः रथिकसाम्यं इन्द्रियादीनां युद्धसामग्रीरूपेण वर्णनं अवय-अवयविभावेन वर्णितम्। रथं- शरीरम् इत्यादि वर्णने शरीरस्य पार्थिवत्वं भूदेव्याः रथरूपेण वर्णनात्गृहीतम्।एवम् आध्यात्मिको सन्देशः मोक्षप्राप्तये सेव्यः उपनिषत्अर्थश्च रथवर्णनेन सूचितः। तदुक्तं -

यः सेतुरीजानामक्षरं ब्रह्म यत्परम्।
अभयं तितीर्षतां पारं नाचिकेत शकेमहि॥
आत्मानं रथिनं विद्धि शरीरं रथमेव च।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥
इन्द्रियाणि हयानाहुः विषयास्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥
यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः॥
यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः॥
यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः।
न स तत्पदमाप्नोति संसारं चाधिगच्छति॥
यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः।

स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥
विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥[1]

## उपयुक्तग्रन्थसूची


1. महाभारतम्, Oriental Books Reprint Corporation, New Delhi, 1979
2. कठोपनिषत्, मोतिलाल बनारसी दास, वाराणसी, 1959



Associate Professor
Dept.of Sahitya
National Sanskrit University, Tirupati
E.Mail: drchakrijb@gmail.com


❑ ❑ ❑

[1]कठोपनिषत् -तृतीयवल्ली – २-९ श्लोकाः, पृ.सं – ७९-८१

**महस्विनी – विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452)**
**कुसुमम् :** अगस्त - डिसेम्बर २०२२ **सम्पुटम् :** द्वितीयम्

# काव्येषु बिम्बविधानप्रक्रिया

**डा. भारतभूषणरथः**

**शोधसारः –**

कवेः मानसपटले या अलौकिकी भावना सृष्टिर्भवति सा यदि काव्ये चित्रिता भवति तर्हि बिम्बमिति उच्यते। सरलरूपेण एवमपि वक्तुं शक्यते कवेः अपूर्वा रचना एव बिम्बम्। आङ्ग्लभाषया 'Image' इति शब्देन अस्य व्यवहारः। कवेः काश्चन भावनाः नियमरहिताः भवन्ति। यतः कविभारती नियतिकृतनियमरहिता एव । कवेः भावनायाः प्रदर्शनं यद्यपि शब्दद्वारेणैव भवति तथापि शब्दस्यान्तराले एकं छायाचित्रं भवति। इदं छायाचित्रं काव्यान्तर्गतां भावनां द्विगुणितां करोति। तदेव छायाविधानं बिम्बविधानमिति उच्यते। रमणीयार्थस्य प्रतिपादनार्थं कविभिः तादृशं बिम्बं स्वकाव्ये प्रयुज्यते। वहुत्र उपमा तथा उत्प्रेक्षा अलङ्कारप्रयोगे बिम्बदर्शनं भवति। अतः कवयः बिम्बविधानेन सह काव्यनिर्माणं कृत्वा काव्यसौन्दर्यमभिवर्द्धयन्ति। वेदादारभ्य साम्प्रतं परिदृश्यमानेषु काव्येषु बिम्बं द्रष्टुं शक्यते। शोधपत्रेऽस्मिन् काव्येषु बिम्बविधानप्रक्रियाविषये चर्चा विहिता ।

**बिम्बशब्दस्यार्थः –**

आचार्यरहसबिहारीद्विवेदिमहोदयः स्वनव्यकाव्यतत्त्वमीमांसायां बिम्बलक्षणं स्पष्टयति। यथा –

काव्यसृष्टिक्षणे कर्तुश्चित्ते नानानुभूतयः।
कल्पनामधिरोहन्त्यो वैखरीव्यक्तिबिम्बिताः ।।
भावकेन्द्रितसंस्काराता भावावेष्टिताः समाः।
प्रत्यक्षमिव दृश्यन्ते काव्यबिम्बः स कथ्यते।।

स बाह्याभ्यन्तराभ्याञ्च कारणभ्यां द्विधा मतः।
बाह्ये दृश्यं ध्वनिः स्पर्शो गन्धास्वादौ च पञ्चधा ।।
आभ्यन्तरे स्थितो भावः प्रज्ञा चेति द्विधा कृतः।
प्रत्येकं बहवो भेदाः सङ्करैकलभेदतः।।[1]

उक्तं कोशेषु –

(I) "Images are representation or lankness of an animate and inanimate object." The world image will be employed to denote any artificial representation of any person or thing. [2]

(II) It is a figure of speech. [3]

(III) C.D.Lewis **कथयति** –

"The poetic image is a picture made out of words. It is a picture in the mind. It's an idea. It is releasing a special poetic emotion to the reader."

**काव्येषु बिम्बप्रयोगः –**

ऋग्वेदे बिम्बप्रयोगस्य उदाहरणं मिलति। ऋषयः मन्त्रद्रष्टारः इति कथ्यते। अतः बिम्बविधाने तेषां सामर्थ्यं वेदे वहुत्र द्रष्टुं शक्यते। मित्रसमानः अग्निः यज्ञसन्दर्भे प्रदीपो भूत्वा रक्षति। एवम् अग्निसूक्ते तथा च उषस्सूक्ते, पृथिवीसूक्ते च बिम्बप्रयोगः दृश्यते। बिम्बमाध्यमेन समाजसुरक्षायै वैदिकऋषिः दत्तचित्तः आसीत्।

रामायणे बिम्बस्य सङ्केतः वर्तते। यथा –

चिरनिवृत्तमप्येतत्प्रत्यक्षमिव दर्शितम्।। [4]

आदिकाव्ये रामायणे बहुत्र बिम्बप्रयोगः दृश्यते। तत्र सुन्दरकाण्डे सीतायाः सौन्दर्यं वर्णयित्वा वाल्मीकिः बिम्बप्रयोगं करोति। यथा –

त्वां कृत्वोपरतो मन्ये, रूपकर्ता स विश्वकृत्।
नहि रूपोपमा ह्यन्या तवास्ति शुभदर्शने ।।

आचार्यः अभिनवगुप्तः रसनिष्पत्तिसूत्रव्याख्याने अस्य समर्थनपूर्वकं कथयति – 'प्रत्यक्षमिवानुभावयन्' इति।

महाकविः कालिदासः मेघदूते प्रारम्भे बिम्बं दर्शयति। य़था –

आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श।। 5

अत्र मेघः गज इव प्रतिभाति इति स्पष्टरूपेण शाब्दिकबिम्बप्रयोगः। समानरूपेण भारविः अपि किरातार्जुनीये गजं मेघरूपेण वर्णयति। इन्द्रस्य दैवगजाः आकाशे सरन्तः पयोदसदृशाः प्रतिभान्ति। यथा –

सिन्दूरैः कृतरुचयः सहेमकक्ष्याः
स्त्रोतोभिः त्रिदशगजा मदं क्षरन्तः।
सादृश्यं ययुररुणांशुरागभिन्नैः
वर्षद्भिः स्फुरितशतह्रदैः पयोदैः।। 6

कुमारसम्भवे ध्वनिप्रेरितं बिम्बं दृश्यते। यथा –

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती।। 7

देवर्षौ एवंवादिनि सति पार्वती पितुः पार्श्वे अधोमुखी सती लीलाकमलपत्राणि गणयामास। अत्र समाजस्य चित्रं बिम्बरूपेण प्रतिपादितम्।

नैषधीयचरिते प्रकृतेः बिम्बं शोभनं वर्णितम्। यथा –

कालः किरातः स्फुटपद्मकस्य वधं व्यधाद् यस्य दिनद्विपस्य।

तस्यैव सन्ध्या रुचिरास्रधारा ताराश्च कुम्भस्थलमौक्तिकानि ।। 8

अत्र कालः किरातरूपं धारयति। दिवसः कश्चन महागजः। कालरूपिणा किरातेन महागजो मारितः। तस्य मृतगजस्य शोणितधारा शोणितसंध्यारूपेण परिणमिता । तस्माच्छरीराद् वेगेन विच्छुरितानि मौक्तिकानि नक्षत्राणि इव उपर्युपरि आकाशमार्गं प्रति अपतन्। कवेः इयम् अपूर्वा कल्पना संध्याबिम्बं प्रकटयति। एवमेव प्रथमे सर्गे पर्वतवर्णनावसरे वृक्षाणां वर्णनं वर्तते। तत्र आम्रवृक्षस्य वर्णनम् एवमस्ति –

रसालसालः समदृश्यतामुना स्फुरद्विरेफारवरोषहुङ्कृतिः।
समीरलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्ज्जनाभियम्।। 9

राजा नलः आम्रवृक्षं ददर्श। वृक्षेऽस्मिन् चूतमञ्जर्य आसन्। एता मञ्जर्यो वायुना शनैः-शनैः कम्पिताः सन्ति। तदुपरि उड्डीयमानाः षट्पदाः अगुञ्जन्। एतद्दृश्यवीक्षणेन ज्ञायते यत् रसालवृक्षः भ्रमराणां गुञ्जनैः विरहिजनान् भययुक्तान् करोति। अत्र उत्प्रेक्षालङ्कारेण आम्रवृक्षस्य मनोहरबिम्बःप्रतीयते। दृश्यबिम्बेन सह द्विरेफैः गुञ्जनस्य हेतोः नादबिम्बस्य धारा उदेति। एवमेव राजा नल एकस्मिन् समये वनविहारं करोति। वने विहारसमये तडागसमीपमगमत्। तडागवर्णने बिम्बविधानं परिलक्ष्यते। यथा –

रथाङ्गभाजा कमलानुषंगिणा शिलीमुखस्तोमसखेन शार्ङ्गिणा।
सरोजिनीस्तम्बकदम्बकैतवान्मृणालशेषा हि भुवान्वयायि यः।। 10

पुष्करिण्यां सरोजानि प्रस्फुटितानि। एतानि विकसितकमलानि विष्णोः रूपं प्रकटयन्तीति कवेराशयः। सरोवरेऽस्मिन् विद्यमानो विहङ्गश्रेष्ठः चक्रवाको नारायणस्य चक्रमिति उच्यते। पुष्पे भ्रमतां भ्रमराणां गुञ्जनं शार्ङ्गधन्वनो धनुष्टङ्कारः। धवलं मृणालं

शेषनाग इव प्रतिकरोति। एतानि लक्षणानि भगवतो विष्णोः क्षीरसमुद्रवत् शोभां व्यञ्जयन्ति। अत्र प्रकृतेः विशेषवर्णनं ध्वनिबिम्बं जनयति। समाजस्य चित्रम् उपस्थाप्य ध्वनिबिम्बस्य अन्यदेकम् उदाहरणं यथा –

न केबलं प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः।
विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि।।[11]

यदा राजा नलः स्वर्णं हंसं स्वहस्तयोः धरति तदा हंसः स्वप्राणरक्षायै राजानं निवेदयति। यद्यपि नलस्य हृदि हंसं प्रति तथा भावना नास्ति तथापि हंसः चिन्तयति मम स्वर्णं नेतुम् अयं राजा अवश्यं मम जीवनं नेष्यति इति। अतः जीवहिंसां निन्दति हंसः। हृदि विश्वासमुत्पाद्य कस्यचित् हिंसा सर्वथा निन्दनीयं कार्यम् इति हंसः वदति। विशेषतया निर्वलानाम् उपरि पराक्रमप्रदर्शनमत्यन्तं निन्दनीयम्। हंसमुखात् एतादृशं वाक्यं श्रुत्वा विस्मितः नलः। नलस्य हृदि दयाभाव उत्पन्नः। यथा –

पदे पदे सन्ति भटा रणोद्धटा न तेषु हिंसारस एष पूर्य्यते।
धिगीदृशन्ते नृपतेः कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि।।
फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः।
त्वयाऽद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी हृणीयते।।
इतीदृशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः।
दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः।। [12]

हंसः स्ववचोभिः नलस्य हृदि दयायाः नदीं प्रवेशयामास। नयनाश्रुविगलितेन आर्त्तस्वरेण हंसः स्वपारिवारिकीं स्थितिं कथयति। यथा –

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे ! त्वां करुणा रुणद्धि नो।। [13]

हंसस्य परिवारे वृद्धा माता नवप्रसूता दीना भार्या च भवतः। एष हंसस्तयोर्द्वयोः जीवनम्। अतो दुःखाभिभूते समयेऽस्मिन् विधातुः करुणाम् ईप्सति हंसः।

श्रीहर्षकवेः एतादृशी वर्णना अत्यन्तं भावगर्भा। साम्प्रतिकसमाजे एषा स्थितिः वहुधा परिलक्ष्यते। धनिकजनैः दरिद्राः प्रतारिताः। यः उच्चपदव्याम् अस्ति सः साधारणनागरिकस्य स्थितिमविगणय्य स्वार्थाय कार्यं करोति। येन समाजे समरसता न भवति। जनेषु शान्तिः मैत्री च न परिलक्ष्यते। अतः सामाजिकचित्रस्योपस्थानपूर्वकमत्र समाजबिम्बमिति निर्द्धारयितुं शक्यते।

शिशुपालवधे महाकाव्ये इन्द्रियग्राह्यवस्तूनां वर्णने बिम्बविधानं परिलक्ष्यते। तत्र प्रथमे सर्गे देवर्षिः नारदः श्रीकृष्णस्य दर्शनार्थम् आगच्छति। यत्र नारदस्य शोभां वर्णयति कविः। एतस्मिन् वर्णने चाक्षुषबिम्बं द्रष्टुं शक्यते। यथा –

श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।
वसन् ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्कभुवं मुनिं हरिः।। [14]

नवानधोऽधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना ।। [15]

भवभूतिः उत्तररामचरिते छाया-अङ्के वहुत्र बिम्बविधानं करोति। एवं कवयः स्वस्वकाव्येषु बिम्बविधानं कृत्वा काव्यचमत्कारमभिवर्धयन्ति। कविः भवति सर्वतन्त्रः स्वतन्त्रः। अतः उक्तं विद्वद्भिः “यत्र यत्र न प्रविशति रविः तत्र तत्र प्रविशति कविः”। वाग्देवतावतारेण मम्मटेन एतदर्थमेव कवेः स्वातन्त्र्यं प्रदर्शितमस्ति। अतः लिखति –

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।। [16]

**सङ्केताक्षरसूची –**

1. नव्यकाव्यतत्त्वमीमांसा – 13. 1-4
2. Encyclopedia of Britannica – Vol.14
3. Dictionary of world literature
4. रामायणे बालकाण्डे – 4.16
5. मेघदूतम् – 2
6. किरातार्जुनीयम् – 8.8
7. कुमारसम्भवम् – 6.84
8. नैषधीयचरितम् – 22.9
9. नैषधीयचरितम् – 1.89
10. नैषधीयचरितम् – 1.111
11. नैषधीयचरितम् – 1.131
12. नैषधीयचरितम् – 1.131 – 134
13. नैषधीयचरितम् – 1.135
14. शिशुपालवधम् – 1.1
15. शिशुपालवधम् – 1.3
16. काव्यप्रकाशः – 1.2

**सन्दर्भग्रन्थसूची –**

1. काव्यप्रकाशः – आचार्यमम्मटः – व्याख्या - आचार्यविश्वेश्वरः – ज्ञानमण्डल लिमिटेड् - वाराणसी
2. किरातार्जुनीयम् – भारवीकृतम् – भारतीयविद्याप्रकाशनम्, नवदेहली

3. कुमारसम्भवम् – कालिदासविरचितम् – व्याख्या – प्रद्युम्नपाण्डे - चौखम्बाविद्याभवनम्, वाराणसी
4. नाषधीयचरितम् –श्रीहर्षविरचितम्- व्याख्या – केशवरावमुसलगाँवकर- चौखम्बाप्रकाशनम्, वाराणसी
5. मेघदूतम् – कालिदासप्रणीतम् –व्याख्या – गोस्वामीप्रह्लादगिरिः - भारतीयविद्याप्रकाशनम्, नवदेहली
6. शिशुपालवधम् – माघकविः – व्याख्या – केशवरावमुसलगाँवकर - चौखम्बाप्रकाशनम्, वाराणसी
7. History of Sanskrit Literature – S K De – Motilal Banarasidass, New Delhi

**डा. भारतभूषणरथः**
सहायकाचार्यः - साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

❑ ❑ ❑

# सांख्यदर्शने मनोविज्ञानम्

**डा. ए. शेखर रेड्डी**

**पत्रस्योद्देश्यानि -**

- **अधिगमकर्तारः सांख्यदर्शनस्य विषये परिचिताः भविष्यन्ति।**
- **सांख्यदर्शने निहितव्यक्तित्त्वानां विषये ज्ञानं भवति।**
- **त्रिविधदुःखानां विषये ज्ञानं प्राप्तुं समर्थाः भविष्यन्ति।**
- **व्यक्तित्व मूल्यानां शिक्षणं भविष्यति ।**

## सांख्यदर्शनम्

दर्शनस्यास्य प्रवक्ता कपिलमुनिः। शास्त्रेऽस्मिन् संक्षेपतः तत्त्वचतुष्टयस्य अस्तित्वमभ्युपगतम्। तानि यथा- प्रकृतिः, प्रकृतिविकृत्युभयात्मिका, केवलविकृतिः, अनुभयात्मिका चेति। प्रकृतेः मूलप्रकृतिः अथवा प्रधानमित्यपि नामान्तरम्। यतो हि सा एव समस्तजगतः मूलकारणभूता। या स्वभिन्नतत्त्वान्तरोत्पत्तौ कारणात्मिका सा प्रकृतिरिति सामान्यलक्षणम्।

प्रकृतेः लक्षणम् अष्टतत्त्वेषु अनुस्यूतं भवति। तानि - प्रधानं, महत्तत्वम्, अहङ्कारः, शब्दः, स्पर्शः, रूपं, गन्धः इति। शब्दादयः पञ्च तन्मात्ररूपेण स्वीक्रियन्ते। अत्र क्रमोऽयं - प्रधानात् महत्तत्त्वस्योत्पत्तिः, प्रधानं न कस्मादपि उत्पत्तिं भजते। प्रधानेनैव समस्तप्रपञ्चोत्पत्तिः इति कारणात् एतत् मूलप्रकृतिरित्याम्नायते। महत्तत्त्वात् अहंकारस्योत्पत्तिः। अस्मात् शब्दादीनि पञ्च तन्मात्राणि उत्पद्यन्ते। प्रधानवत् महत्तत्वमपि अहंकारस्य प्रकृतिः, प्रधानस्य च

विकृतिः। तद्वत् अहङ्कारोऽपि पञ्चतन्मात्राणां प्रकृतिः, महत्तत्वस्य विकृतिश्चेति। पञ्चतन्मात्राणां सकाशात् पञ्चमहाभूतानि उत्पत्तिमत्वं प्राप्नुवन्तीत्यतः एतेषां भूतपञ्चकानां प्रकृतिरूपाणि पञ्चतन्मात्राणि। इमानि पञ्च तन्मात्राणि अहङ्कारं प्रकृतित्वेन आमनन्ति इत्यतः विकृतिरूपाणि। तस्मात् महदादि सप्तप्रकृतिविकृतयः इति भण्यन्ते।

अत्रेयं सांख्यकारिका **मूलप्रकृतिर्विकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारः न प्रकृतिर्नविकृतिः पुरुषः।** ( सांख्य,का,45)

पञ्चमहाभूतानि, पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि एवं मनः इत्याहत्य इमानि षोडशतत्त्वानि केवलं विकृतिमात्राणि भवन्ति। यतः एतैः तत्वैः तत्त्वान्तरस्योत्पत्तिः न भवतीति कृत्वा इमानि षोडशतत्त्वानि, अन्यस्य प्रकृतिरूपाणि न भवन्ति। विकृतिरूपेण षोडशतत्त्वानि, प्रकृतिविकृतिरूपेण महदादि सप्त, एका मूलप्रकृतिरिति आहत्य चतुर्विंशतिसंख्यकानि तत्त्वानि भवन्ति। पञ्चविंशतितमः पुरुषः। पुरुषोऽयं जीवात्मा इति कथ्यते। सांख्यमते जीवात्माभिन्नस्य अन्यस्य ईश्वरस्यास्तित्वं नास्ति। जीवात्मा च प्रतिशरीरं भिन्नः। अत्र सूत्रकारस्य प्रामाण्यम् - "**जन्मादिव्यवस्थातः पुरुषबहुत्वम्॥** इति। (सां, द-149) जीवात्मा अनादिः सूक्ष्मः चेतनः सर्वगतः निर्गुणः कूटस्थः नित्यः द्रष्टा भोक्ता क्षेत्रविद् इत्यादिप्रकारेण अभिज्ञायते।

**प्रकृतेः स्वरूपम्**

मूलप्रकृतिः त्रिगुणात्मिका। सत्वरजस्तमोगुणानां या साम्यावस्था सा मूलप्रकृतिरिति। गुणेषु क्रियावत्वं न भवति। अतः सत्वादयः तत्त्वत्रयरूपेण न

स्वीक्रियन्ते। त्रिगुणात्मकं प्रधानमिति एकं तत्त्वमिति निश्चयः। वस्तुतः इमे सत्वादयः त्रयो गुणाः द्रव्यरूपा; न तु गुणरूपाः। तर्हि कथं लोके एतेषां गुणरूपेण व्यवहार अस्योत्तरम् – इमे त्रयः गुणाः पुरुषस्य भोगसाधनीभूताः इत्यतः एते गुणीभूताः भवन्ति। गुणीभूतत्वात् गुणत्वेन व्यवहार न तु वस्तुतः एते गुणा; यतः गुणस्वरूपं गुणभिन्नत्वेन भवति। यथा - गन्धस्वरूपात् भिन्ना या पृथिवी तस्याः गुणः गन्धः इति भवति। एवं प्रकृत्यामेते त्रयः गुणाः न सन्ति यतः गुणत्रयभिन्नत्वेन प्रकृतेः स्वरूपमेव नास्ति। तस्मात् गुणत्रयात्मिका प्रकृति; नैते गुणाः तस्याः धर्मभूताः। तदेव अस्याः स्वरूपं वर्णयति सूत्रकारः-

**"सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वात्"** इति। (सां, द-39)

**गुणस्वरूपम्**

सत्वगुणस्वभावः लघुत्वं प्रकाशकत्वञ्च। रजोगुणस्य स्वभावः चलत्वम्। तमोगुणस्य स्वभावः आच्छादकत्वमिति। अत्रेयं सांख्यकारिका

**सत्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।**
**गुरुवरणकमेव तमः प्रदीपवच्यार्थतो वृत्तिः॥** (सा,का-3)

सत्वगुणः लघुत्वात् प्रकाशक; रजोगुणः सक्रियात्मककारणेन स्वकार्येषु प्रवर्तकः तमोगुणः गुरुत्वात् सर्वपदार्थानामाच्छादकः इत्युच्यते प्रत्येकशः एते त्रयः गुणाः अनेकप्रकारकत्वं भजन्ते। केचन अणुपरिमाणवत्वेन केचन विभुपरिमाणवत्वेन परिगण्यन्ते।

**महत्तत्त्वम्**

बुद्धितत्त्वस्य सांख्ये महत्तत्त्वमिति नाम। धर्मज्ञानवैराग्यैश्वर्यादि उत्कृष्टगुणानामाश्रयभूतमेतत्तत्त्वमिति महत्तत्त्वेनास्य व्यवहारः। यद्यप्यस्मिन् महत्तत्त्वे सत्वादयः त्रयः गुणाः वर्तन्ते अथापि सत्वगुणप्राधान्येन रजस्तमसी तिरोहिते भवतः। बुद्धिः मनोऽहङ्कारादयः महत्तत्त्वपरिणामविशेषाः। एतेषां त्रयाणामन्तःकरणमिति अभिधानम्। यदा अन्तःकरणं निश्चयात्मकवृत्तिमत् भवति तदा बुद्धिरिति, अभिमानात्मकवृत्तिरूपेण परिणतान्तःकरणस्य अहङ्कारः इति, सङ्कल्पविकल्पात्मकरूपेण एवं संशयात्मकत्वेन परिणतमन्तःकरणं मनः इति चाभिधीयते। यथा प्रधाने सत्वादिगुणानाम् अणु-विभुभेदेन अनेकप्रकाराः उपन्यस्ता; तथा महत्तत्वेऽपि अनेकप्रकारात्मकाः भेदाः सिध्यन्ति। ब्रह्मादिस्थावरपर्यन्तं सर्वेषु जीवेषु महत्तत्वमेकमस्तीति अभ्युपगम्यते।

**अहङ्कारविचारः**

अयमहङ्कारः बुद्धिविशेषात्मकः। अहन्ता इति अहमाकारात्मिका बुद्धिः, इदन्ता इति इदमाकारात्मिका बुद्धिः। अयं व्यवहारः एव बुद्धिविशेषः इत्युच्यते। अहन्ताबुद्धिं विना इदन्ताबुद्धिः नोदेवि अतः अहन्ताबुद्धिविशेष-भूताहकारस्योत्पत्तिरिति। अस्मिन् अहङ्कारे सत्वादिगुणानामुत्कर्षापकर्षण त्रयः भेदाः उत्पद्यन्ते। यथा - सात्विकभेदस्य वैकारिकः इति, राजसभेदस्य तैजसः इति, तामसभेदस्य भौतिकः इत्यभ्युपगमः। सात्विकाहङ्कारः रजोगुणसाहाय्येन प्रवृत्यात्मकधर्मभूतान् एकादशेन्द्रियान् उत्पादयति। पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, एकं मनः इति एकादशेन्द्रियाणि।

**पञ्चतन्मात्राणि**

शब्दस्पर्शरूपरसगन्धाख्यानां पञ्चानां तन्मात्रत्वेन व्यवहारः। एतेषु भेदद्वयमस्ति- सविशेषः निर्विशेषश्चेति। तत्र शब्दे उदात्तानुदात्तनिपात-गन्धर्वात्मकाः विशेषगुणाः वर्तन्ते। स्पर्शउष्णत्वशीतत्वमृदुत्वादिविशेषगुणाः रूपे शुक्लत्वकृष्णत्वादि-विशेषगुणाः रसे मधुरत्वाम्लत्वादिविशेषगुणाः सन्ति। इमानि पञ्चतन्मात्राणि क्रमात् आकाश-वायु-तेजो-जल-पृथिव्यादिपञ्चमहाभूतानां प्रकृतिरूपाणि वर्तन्ते। आहत्य पञ्चविंशतितत्त्वानां विवरणमेवप्रस्तूयते -

**पञ्चविंशतितत्त्वानां विवरणम्**

| स्वरूपम् | संख्या | विवरणम् |
|---|---|---|
| प्रकृतिः | 1 | मूलप्रकृतिः |
| विकृतिः | 16 | पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनः, पञ्चमहाभूतानि |
| प्रकृति-विकृतिः | 7 | महत्तत्त्वम्, अहङ्कारः, पञ्चतन्मात्राणि |
| न प्रकृतिर्नविकृतिः | 1 | पुरुषः |

**सत्कार्यवादः**

किं कार्यम्, किं कारणमिति विप्रतिपत्ति साङ्ख्यमतं यत् कार्यकारणयोः तात्त्विकभेदः। कार्यस्याव्यक्तावस्थैव कारणम्, कारणस्य च व्यक्तावस्थैव कार्यम् इति। यथा - घटः मृद्रूपेण कारणम् मृच्च घटरूपेण परिणतं कार्यमिति।

साङ्ख्यानाम् अयं सिद्धान्तः विकारवाद परिणामवादः, सत्कार्यवादः इत्यादिनामभिः व्यपदिश्यते। अत्रेयं हि कारिका -

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥** (सां,का-9)

साङ्ख्यदर्शनमिदं प्रत्यक्षानुमानशब्दाश्चेति प्रमाणत्रयम् अभ्युपगच्छति। सांख्यस्य निरीश्वरत्वं मन्यते परम् आचार्यः विज्ञानभिक्षु : ईश्वरस्य सेश्वरत्वं साधयति। पुरुषः स्वतः असङ्गो मुक्तच अविवेकेन तस्य बन्धनम्। विवेकेन दु:खनिवृत्तिः। पुरुषस्य प्रकृतिपार्थक्यं स्वरूपावस्थानं वा अपवर्गः।

**साङ्ख्यदर्शने मनोविज्ञानम्**

'सङ्ख्याबुद्धिर्ज्ञानम्' इति कोशवाक्यानुसारेण संख्याशब्दो ज्ञानपरः। अत्र हि एका मूलप्रकृतिः, सप्त प्रकृतिविकृतयः, षोडश केवला विकृतयः, एकः प्रकृतिविकृतिभिन्नः पुरुष इति आहत्य पञ्चविंशतिसङ्ख्यकानां तत्त्वानां बोधकं साङ्ख्यमिति शास्त्रं महर्षिकपिलेन प्रणीतम्। दर्शनस्यास्य प्रथमसूत्रे महर्षिः त्रिविधदुःखानामत्यन्तनिवृत्तिरेवमानवस्य परमपुरुषार्थत्वेन उवाच। उक्तानां त्रिविधदुःखानां समावेशः त्रिषु वर्गेषु समुद्दिष्टः। यथा-

**अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्वन्तपुरुषार्थी** (सां. .1-1)

**आध्यात्मिकदुःखम्**

तत्रात्मानम् अधिकृत्य प्रवृत्तं दुखमाध्यात्मिकम्। इदञ्च द्विप्रकारकम् –

1) **शारीरम्** - वातपित्तश्लेष्माणां वैषम्येण जनितं दु: खं शारीरम्

11) **मानसम्** - कामक्रोधलोभमोहमदमत्सरादीनां प्रकोपेण जायमानं दुःखं मानसिकम्।

**आधिभौतिकदुःखम्**

व्याघ्रचौरादिभूतेभ्यः जायमानं दुःखम् आधिभौतिकम्।

**आधिदैविकदुःखम्**

आतप-वृष्टि-विद्युत्पात-हिमपात-भूकम्पाद्युत्पातान् अधिकृत्य प्रवृत्तदु :खमाधिदैविकम्। इत्थं जीवाः त्रिविधदुःखैः अहर्निशं सन्तप्ताः दृश्यन्ते। अतः दुःखानां दूरीकरणाय साधनानि चिन्तनीयानि। एतानि साधनानि लौकिकानि वैदिकानि इति द्विधा। परन्तु लौकिकसाधनैः दुःखाभावः न दृष्ट; वैदिकसाधनेष्वपि अनैकान्तिकत्वबुद्धिर्जायते। यथोच्यते साङ्ख्यकारिकायाम् -

**"दृष्टवदानुश्रविकः सो ह्यविशुद्धिक्षयातिशययुक्तः।**
**तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्॥** (सा,का-2)

नाम लौकिकालौकिकसाधनव्यतिरिक्तं व्यक्ताव्यक्तज्ञानां भेदपूर्वकज्ञानस्वरूपं विज्ञप्तमेव केवल्यावाप्तेः साधनमस्ति। तानि च व्यक्ताव्यक्ताख्यानि साधनानि पञ्चविंशतितत्त्वानीति। एतेषां स्वेतरव्यतिरिक्तानां समेषां तत्त्वानामुपादानकारणमस्य जगतः मूलभूता प्रकृतिरिति। यदा अस्याः जडायाः प्रकृतेः निर्विकारेण पुरुषेण संयोगो जायते तदा तस्यां प्रकृतौ क्षोभः जायते, तेन प्रवर्तते इयं सृष्टिः। सृष्टिक्रममेवमभिहितमीश्वरकृष्णेन - प्रकृतेर्महत्, महतोऽहङ्कारः, अहङ्कारादेव पञ्चतन्मात्राणि, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि मनश्चोत्पद्यन्ते। रूपरसगन्धस्पर्शशब्दतन्मात्राख्यानि पञ्चतन्मात्राणि।

चक्षुत्वासनाश्रोत्रघ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि। वाक्पाणिपादपायू पस्थाख्यानि पञ्चकर्मेन्द्रियाणि च सन्ति। पुनश्च तत्र पञ्चतन्मात्रेभ्यः पृथिव्यप्तेजोवाय्वाकाशाख्यानि पञ्चमहाभूतानि जायन्ते।

**सन्दर्भग्रन्थसूची**

1.योगवासिष्ठम्

2.योगसूत्रम्

3.योगदर्शनम्

4.सांख्यदर्शनम्

5.भगवद्गीता

Dr.A. SHEKAR REDDY
Assistant professor
Dept, of Education,
National Sanskrit University,
Tirupati.
drshekar@nsktu.org
MOBILE- 9966389556

❑ ❑ ❑

# मीमांसाज्ञानपरम्परानुसारेण धर्माधर्मयोः लक्षणविचारः

**महेश चिदम्बर भट्टः**

भगवान् जैमिनिः समनुतिष्ठासा मानवेषु अधिकारिषु भवतु इत्येतदर्थं द्वादशाध्यायोपेतं चतुर्दशविद्यास्थानेषु अन्यतमं[1], "ब्रह्मा प्रजापतये मीमांसां प्रोवाच, सोऽपीन्द्राय, सोऽप्यादित्याय, स च वसिष्ठाय, वसिष्ठः पराशराय, पराशरः कृष्णद्वैपायनाय, कृष्णद्वैपायनः जैमिनये, स च शास्त्रमिदं ग्रन्थे निबद्धवान्"[2] इत्येवं क्रमेण ब्रह्मणः आगतं मीमांसाशास्त्रं सूत्रेषु निबबन्धुः। शास्त्रेस्मिन् द्वादशसु अध्यायेषु धर्माधर्मौ व्यचीचरताम्। तदेवमवादि सायणमाधवाचार्येण -

धार्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्रलक्षणैः ।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः।
अधिकारोऽतिदेशश्च सामान्येन विशेषतः।
ऊहो बाधश्च तन्त्रञ्च प्रसङ्गश्चोदिताः क्रमात् ॥ इति ॥[3]

अत्रत्यं धर्मपदं अधर्ममपि गृह्णाति। विना असत्यज्ञानं सत्यस्य समीचीनं ज्ञानं यथा न भवति तथा विना अधर्मज्ञानं धर्मज्ञाननिश्चयः न स्यात् तस्मात्। अपि च निषेधादिवाक्यानां शास्त्रेऽस्मिन् विचाराविषयत्वापत्तेः शास्त्रस्यास्य प्रमेयभूतौ धर्माधर्मौ

---

1. पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
   वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ याज्ञवल्क्यस्मृतिः
2. श्लोकवार्तिकप्रास्ताविके उल्लेखः वर्तते। प्रुष्ठ सङ्ख्या ०८
3. जैमिनीयन्यायमाला, ग्रन्थावतरणिका पृ.सं ०५

इत्यङ्गीचक्रुः[1]।

अतः धर्मो नाम कः इति विचिचारयिष्यते।

**कः धर्मः इति विचारः -**

कर्मनाशाजलस्पर्शात् करतोयाविलङ्घनात्।
गण्डकीबाहुतरणात् धर्मः क्षरति कीर्तनात् ॥[2]

एवं "प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपि" इत्यादौ धर्माधर्मयोः नाशः यः उक्तः सः क्रियारूपधर्मे न संभवति, तस्य क्षणिकत्वादित्यतः कणादमहर्षिः विहितक्रियाजन्यः अदृष्टविशेषः धर्मः, निषिद्धकर्मजन्यः अदृष्टविशेषः अधर्मः इत्येवं क्रियाजन्यादृष्टे धर्माधर्मशब्दप्रयोगं अभिप्रैत्। परन्तु –

धर्मः स्वनुष्ठितः पुंसां विष्वक्सेन कथासुयः
नोत्पादयेद्यदि रतिं श्रम एव हि केवलं।।[3]

एवं **धर्मं चरति** [4] इत्यादौ धर्मस्य अनुष्ठानमाचरणं वा अवाचि। अनुष्ठानादिकं तु क्रियाविशेषस्यैव भवति नत्वदृष्टस्य। एवं क्रियाविशेषे अपि धर्मशब्दं प्रायुञ्जन् इति हेतोः क्रियारूपः यागादिरेव धर्मः इति स्व्यकारि मीमांसकैः। अतः इदानीं एतन्मतानुसारेण क्रियारूपस्य यागादेः धर्मस्य, कलञ्जभक्षणादेः अधर्मस्य च लक्षणं निरुरूपयिष्यते।

---

4. शास्त्रदीपिकायां पार्थसारथिमिश्राः – धर्मग्रहणं चोपलक्षणार्थं
   भाट्टरहस्ये – धर्माधर्माविव जैमिनिनानुष्ठानोपयोगितया विचारितौ इत्येवमुक्तत्वात्
5. खण्डदेवभावप्रकाशः, पृ.सं ०४
6. भागवतम्.
7. अष्टाध्यायी ४.४.४१

**धर्माधर्मयोः लक्षणनिरूपणम् -**

विहितक्रियात्वम् धर्मत्वं, निषिद्धक्रियात्वं अधर्मत्वं [1] इति यदि उच्येत तर्हि विहितनिषिद्धद्रव्यादौ दधिरजतादौ अव्याप्तिः स्यात्। “दध्नेन्द्रियकामस्य जुहुयात्” इति वाक्येन दधि इन्द्रियरूपफलोद्देशेन व्यधीयत। एवं “बर्हिषि रजतं न देय”मिति वाक्येन दानकर्मणि रजतं न्यषिध्यत। यदि अत्र धर्मत्वाधर्मत्वे न अभविष्यताम् तर्हि विहितद्रव्यानुष्ठातृषु धार्मिकः इति शब्दप्रयोगः, निषिद्धद्रव्यानुष्ठातृषु अधार्मिकः इति शब्दप्रयोगश्च न अभविष्यताम्। तथा तु नास्ति, प्रयोगस्तु लोके दृश्यते इति चेत् अस्तु तर्हि विहितत्वं धर्मः निषिद्धत्वमधर्मः इत्युद्यताम् तदा विहितनिषिद्धद्रव्येषु नाव्याप्तिः तत्रापि उक्तलक्षणसत्वादिति चेत्, न, एवमुच्यमाने “विवाहेऽनृतं वदेत्” इत्याद्यभ्यनुज्ञाविधिना विहितेषु विवाहार्थानृतवदनादिविषयेषु धर्मलक्षणस्य अतिव्याप्तिः स्यात्, एवं “न षोडशिनं गृह्णाति” इत्यादिवाक्येन निषिद्धेषु षोडशिग्रहणादिविषयेषु अधर्मलक्षणस्य अतिव्याप्तिः स्यात्। यतः अभ्यनुज्ञाविधिर्नाम प्रमाणान्तरप्रतिपन्नानिष्टसाधनत्वस्य तदभावावधारणमात्रफलकः विधिः[2]। “नाऽनृतं वदेत्” इति निषेधवाक्येन कृते अनृतवदने अनिष्टं भवतीति अबोध्यत। परन्तु “विवाहेऽनृतं वदेत्” इति विधिः विवाहसङ्घटनाय अनृतवदनं न विदधाति अपि तु दोषाभावमात्रं बोधयति। अतः अभ्यनुज्ञाविधिविषयः न धर्मः नाप्यधर्मः। परन्तु विहितत्वं धर्मलक्षणमित्युच्यते चेत् विवाहार्थानृतवदने विधिविषयत्वरूपं

---

8. विहितक्रियाजन्यः धर्मः, निषिद्धकर्मजन्यस्त्वधर्मः इति तर्कसङ्ग्रहे
9. खण्डदेवभावप्रकाशः . पृ सं ०६

विहितत्वमस्तीत्यतः अतिव्याप्त्यापत्तिः स्यात्। एवं "षोडशिनं गृह्णाति" इति वाक्येन अतिरात्रसंस्थाकज्योतिष्टोमनामके यागे षोडशिग्रहग्रहणं यद्विहितं तदेव "न षोडशिनं गृह्णाती" त्यनेन निषेद्धुं न शक्यते[1] इत्यतः अत्रापि निषेधवाक्यं दोषाभावमात्रं बोधयति। बोधयति। विधिस्तु फलाधिक्यमाक्षिपति। अतः अत्र षोडशिग्रहग्रहणाननुष्ठानं नाधर्मः। परन्तु निषेधविषयत्वमधर्मलक्षणमिति उच्यते चेत् अत्र अतिव्याप्तिः स्यात् अतः एवं धर्माधर्मयोः लक्षणं वक्तुं न शक्यते।

अपि तु वेदबोधितश्रेयस्साधनताकत्वं धर्मत्वं, वेदबोधितानिष्टसाधनताकत्वमधर्मत्वमिति [2] धर्माधर्मयोः लक्षणं ज्ञेयम्। तदौद्यत जैमिनिना - "चोदना लक्षणोऽर्थो धर्मः"[3] इति। ज्योतिष्टोमादियागानां स्वर्गादिरूपफलसाधनत्वं "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिवेदवाक्येन बोध्यते इत्यतः धर्मत्वमिति धर्मलक्षणसमन्वयः। कलञ्जभक्षणादीनां अनिष्टसाधनत्वं "न कलञ्जं भक्षयेत्" इत्यादिवेदवाक्येन आक्षिप्यते[4] इत्यतः अधर्मत्वमिति अधर्मलक्षणसमन्वयः। वेदबोधितत्वमित्येवोच्यते चेत् स्वर्गादिषु अतिव्याप्तिः, श्रेयस्साधनताकत्वमित्येवोच्यते चेत् भोजनादौ अतिव्याप्तिः, तद्वारणाय वेदबोधितत्वे सति श्रेयस्साधनताकत्वमिति द्वे दले धर्मलक्षणे वर्तेते। विहितनिषिद्धद्रव्येष्वपि वेदबोधितेष्टसाधनताकत्ववेदबोधितानिष्टसाधनताकत्वे वर्तेते इत्यतः न पूर्वोक्तः अव्याप्तिदोषः। अभ्यनुज्ञाविधिस्तावत् दोषाभावमात्रं बोधयति, इष्टं तु रागादेवप्राप्यते

---

10. विहितस्य निषेधायोगः
11. भाट्टरहस्यम् . पृ सं ०४
12. जैमिनीयं सूत्रम् १.१.०२
13. अर्थसङ्ग्रहः, पृ सं ८८

तद्विधिविषयेषु इत्यतः न अभ्यनुज्ञाविधिविषयेषु वेदबोधितेष्टसाधनताकत्वापत्तिः, एवं विहितस्य निषेधबोधकवाक्येन निषेधविषयेषु दोषाभावमात्रमाक्षिप्यते न तु अनिष्टसाधनत्वमित्यतः न षोडशिग्रहणादौ वेदबोधितानिष्टसाधनताकत्वापत्तिः इत्येतस्मात्कारणान्न पूर्वोक्ता अतिव्याप्त्यापत्तिः। अतः वेदबोधितेष्टानिष्टसाधनताकत्वे धर्माधर्मत्वे इति धर्माधर्मयोर्लक्षणमिति स्थितम्।

**श्येनयागादौ अतिव्याप्तिशङ्का -**

अत्र केवलं एतावदेवोच्येत तर्हि श्येनादौ अतिव्याप्तिस्स्यादिति शङ्क्यते।अत एवोक्तं लौगक्षिभास्करेण - "अनर्थफलकत्वादनर्थभूते श्येनादौ अतिव्याप्तिवारणाय अर्थपदमिति"[1]। श्येनयागः अभिचारसाधनीभूतः। अभिचारश्च वैरिमरणानुकूलव्यापारः। "न हिंस्यात् सर्वा भूतानि" इति हिंसा निषिद्धा वर्तते। हिंसा नाम प्राणवियोगानुकूलव्यापारः। अतः अभिचारस्य हिंसात्मकत्वात्, नाम श्येनयागं कृत्वा अभिचारे कृते शत्रुमरणजननात् परम्परया श्येनयागः हिंसात्मकः एव जातः। तस्मान्निषेधविषयत्वस्यैव अत्र सत्वात् श्येनयागः अधर्मः इति चेत्, न, श्येनयागः अभिचारजनकः न तु हिंसाजनकः। निषेधस्तु हिंसायाः वर्तते तस्मात् हिंसाजनकः अपि नास्ति इत्यतः श्येनयागे न निषेधविषयत्वमिति चेत्, अस्तु, "वैरिमरणकामो यजेत" इत्यत्र तु यागः साक्षात् मरणजनकः भवति अतः तत्र अतिव्याप्तिः स्यात् इति चेत्, न. निषेधः विहितविषये न प्रवर्तते, अपि तु रागप्राप्त हिंसामुपजीव्यैव। अतः परम्परया वा साक्षाद्वा यानि हिंसाजनकानि कर्माणि तान्यपि धर्मरूपाण्येव इति।

सन्देहः – यदि हिंसाजनकेष्वपि कर्मसु धर्मत्वं तर्हि तत्र शिष्टानां

14. अर्थसङ्ग्रहः पृ.सं ०६

निष्कम्पप्रवृत्तिः स्यात्, परन्तु सकम्पप्रव्रुत्तिरेव दृश्यते खलु इति चेत्–

उच्यते – धर्मस्य सात्विकराजसतामसभेदेन विभागः कृतः। तत्र "परस्योत्सादनार्थं यत् तत्तामसमुदाहृतम्" इति भगवता कृष्णेन उक्तं भगवद्गीतायाम्[1]। एवं तामसधर्मत्वकथनेनैव निन्दा प्रतीयते। तया निन्दया निषेधः उन्नीयते। एवमुन्नीतनिषेधवाक्यविषयत्वमत्र वर्तते इत्यतः एतादृशेषु यागेषु अधर्मत्वस्यापि सत्वात् न निष्कम्पप्रवृत्तिः संभवति इति। उपाधिसाङ्कर्येऽपि उपधेयासङ्करः इति न्यायेन धर्मत्वाधर्मत्वे एकत्रैव भवितुमर्हतः । अतः वेदबोधितश्रेयस्सधनताकः धर्मः, तद्बोधितानिष्टसाधनताकः अधर्मः इति खण्डदेवमतम्।

**आपदेवलौगाक्षिभास्करादीनां विचारः -**

खण्डदेवः श्येनयागे धर्मत्वं स्वीकृत्य लक्षणमवोचत्। न्यायप्रकाशादिग्रन्थकर्तारः श्येनादौ धर्मत्वं नास्तीति वदन्ति। अत एव वेदबोधितेष्टसाधनताकत्वमात्रोक्तौ श्येनादावपि तत्सत्वात् अतिव्याप्तिः भवति, अतः तद्वारणाय वेदेन प्रयोजनमुद्दिश्य विधीयमानत्वे सति अर्थत्वं धर्मलक्षणमिति वदन्ति[2]। अत्र अर्थत्वं नाम बलवदनिष्टाननुबन्धित्वम्। बलवदनिष्टाननुबन्धित्वं नाम उत्कटद्वेषविषयत्वम्। अनुबन्धीत्यस्य प्रयोजकः कारणमिति वाऽर्थः। अत्रानिष्टाननुबन्धित्वमित्येवोच्येत तर्हि असम्भवदोषापत्तिः स्यात्। यतः ज्योतिष्टोमादौ सर्वत्रापि धर्मे शरीरवेदनाधनव्ययादिरूपानिष्टं किञ्चित्तु भवत्येव। तस्मादनिष्टानुबन्धीन्येव भवन्ति सर्वाण्यपि कर्माणि इत्यतः धर्मलक्षणं कुत्रापि न समन्वियात्। अतः बलवत्त्वमिति वेशेषणं अनिष्टे अदीयत। निषेधवाक्यावगतानिष्टमेव बलवदनिष्तमिति

15. भगवद्गीता, अध्यायः १७ श्लोकः १९

16. न्यायप्रकाशः पृ.सं १

स्वीक्रियते इत्यतः श्येनादौ निन्दया उन्नीतनिषेधवाक्यावगतानिष्टानुबन्धित्वमेवास्ति अननुबन्धित्वं नास्तीत्यतः श्येनादौ अतिव्याप्तिवारकं भवत्यर्थपदमिति ऊचुः लौगाक्षिभास्करादयः।

परन्तु एतद्दलनिवेशेऽपि आपदेवादिमते अधर्मभूते श्येनादौ अतिव्याप्तिः वारयितुं नैव शक्यते। अनिष्टगतद्वेषौत्कट्यरूपस्य बलवदनिष्टानुबन्धित्वस्य श्येनेऽपि कदाचित्सम्भवात्। अपि च श्येनादौ अधर्मत्वमङ्गीकर्तुमेव न शक्यते, तामसधर्मत्वकथनानुपपत्तेः[17]। अतः बलवदनिष्टाननुबन्धित्वाद्यर्थकार्थत्वादिदलं धर्मादिलक्षणे नापेक्ष्यते इत्यतः औच्यत खण्ददेवेन - "वेदबोधितश्रेयस्साधनताकत्वं धर्मत्वं, तद्बोधितानिष्टसाधनताकत्वमधर्मत्वम्, इत्येव तल्लक्षणोपपत्तेः" इति।

**वेदबोधितत्वदलविमर्शः -**

वेदबोधितत्वे सति श्रेयस्साधनत्वं यथा यागादिषु वर्तते तथा वेदान्तविषयीभूतब्रह्मण्यपि वर्तते। "तरति शोकमात्मवित्" इत्याद्युपनिषद्बोध्यत्वे सति अज्ञाननिवृत्तिरूपमोक्षात्मकश्रेयस्साधनत्वस्य ब्रह्मणि सत्त्वात्। अतः तत्र अतिव्याप्तिवारणाय वेदबोध्यत्वं नाम वेदातिरिक्तप्रमाणेन स्वतन्त्र्येणाबोध्यत्वे सति वेदबोध्यत्वम् इत्युच्यते। तत्त्वज्ञानस्य च अज्ञाननिवृत्तिसाधनत्वं न वेदैकबोध्यम्। तद्विषयकज्ञानसत्त्वे तद्विषयकज्ञाननिवृत्तिः तदभावे तदभावः इति अन्वयव्यतिरेकसहचारज्ञानात्मकप्रमाणान्तरगम्यत्वस्यापि तत्र सत्त्वात्। अतः एवमुच्यमाने न तत्रातिव्याप्तिः इति। यदि मोक्षः अद्वैतशास्त्रोक्तः नाङ्गीक्रियते,अपितु एकविंशतिदुःखध्वंसादिरूपः तत्त्वज्ञानजन्यः मोक्षः इति गौतममतमाश्रियते तदा

---

17. भाट्टतन्त्ररहस्यम् पृ.सं ८

तादृशधर्मस्य वेदैकबोध्यत्त्वात् अतिव्याप्तिः भवत्येव एवमुच्यमानेऽपि। अतः पुरुषकृतिविषयत्वे सति वेदबोधितश्रेयस्साधनताकत्वं धर्मलक्षणमिति वक्तव्यं। तत्त्वज्ञानस्य च प्रमाणजन्यत्वात् वस्तुजन्यत्वाच्च कृत्यविषयत्वात् नातिव्याप्तिः।

**मीमांसावेदान्तशास्त्रयोः भेदाभेदविचारः -**

पूर्वमीमांसायाः धर्मः विषयः, उत्तरमीमांसायाः ब्रह्म विषयः। तस्मात् विषयभेदात् शास्त्रभेदः इति ये मन्वते तेषाम्मते एवं वक्तव्यं भवति। ये ब्रह्म अपि धर्मः एव इति मेनिरे तेषां मते पुरुषकृतिव्याप्यत्वदलं नापेक्ष्यते। तथा सति वेदान्तमीमांसाशास्त्रयोः भेदः नास्ति वा इति चेत्, उच्यते - ब्रह्म अपि धर्मः एव। परन्तु सः सिद्धधर्मः भवति। धर्मत्वेन रूपेण विषयैक्यं वर्तते। अतः शास्त्रैक्यमिति वक्तुं शक्यते। अत एव पूर्वमीमांसा, उत्तरमीमांसा इति व्यवहारः द्वयोः शास्त्रयोः। मीमांसा इति शास्त्रमेकं तत्र भागद्वयमिति अभिप्रायः। एवं व्यापकविषयाभेदेऽपि अवान्तरविषयभेदः वर्तते एव। साध्यधर्मः पूर्वमीमांसाविषयः, सिद्धधर्मः उत्तरमीमांसाविषयः। अपि च इज्याऽचारदयाहिंसादानस्वाध्यायकर्मणाम्।

अयं तु परमो धर्मः यद्योगेनात्मदर्शनम्[1] ॥ इति ॥ अत्र आत्मदर्शनम् आत्मज्ञानं आत्मज्ञानं श्रेष्ठधर्मः इत्येवं ज्ञानेऽपि धर्मशब्दप्रयोगसत्त्वात् ब्रह्मज्ञानस्य धर्मत्वेऽपि न क्षतिः इत्यस्मिन्मते वेदबोधितश्रेयस्साधनताकत्वं धर्मत्वमित्येव धर्मलक्षणमिति।।

**परिशीलितग्रन्थसूची**

१. भाट्टतन्त्ररहस्यम् सारप्रकाशिकाव्याख्ययासहितम्, published by institute Francais de Pondicherry in 2015

18. खण्डदेवभावप्रकाशः पृ.सं ५

२. श्रीमद्भगवद्गीता, स्वामीरामसुखदास्, published by Gitapress Gorakhpur in 2007
३. मीमांसान्यायप्रकाशः, published by चौखम्भा संस्कृत संस्थान in 2008
४. मीमांसापरिभाषा, कृष्णयज्वा, published by Chowkhamba krishnadas academy in 2009
५. अर्थसङ्ग्रहः, तन्त्रप्रकाशिक इति व्याख्योपेतः published by डी.टी.स्वामिप्रकाशनम् in 1998
६. याज्ञवल्क्यस्मृतिः
७. श्लोकवार्तिकम् published by Ratna publications, Varanasi in 2007
८. भागवतम्
९. कृष्णयजुर्वेदीयतैत्तिरीयब्राह्मणम् published by श्रीनृसिंहप्रिया ट्रस्ट् in 2016
१०. खण्डदेवभावप्रकाशः, पेरी सूर्यनारायणशास्त्रि published in 1985

**महेश चिदम्बर भट्टः**
अतिथ्यध्यापकः, मीमांसाविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
soolgarcmaheshbhat@gmail.com

❑ ❑ ❑

# शक्तिवादः

**अभिषेक मुखोपाध्यायः**

**शोधसारः**

"शक्तिः करोति ब्रह्माण्डं सा वै पालयतेऽखिलम्[1]" इति पुराणवचनं शक्तिं विना ब्रह्म निष्क्रियमिति प्रमाणीकरोति। अतो जगत्सर्जने पालने च शक्तेर्भूमिकानस्वीकार्या। शक्तिर्ब्रह्म च परस्परं भिन्नमपि न, किन्तु अभिन्नम्, यथा अग्निस्तस्य दाहिका शक्तिश्चाभिन्नो भवति। अग्निं विना दाहिका शक्तिः स्थातुमेव न शक्नोति। वर्तमानोऽयं मे प्रबन्धोऽस्याः शक्तेर्वेदादिशास्त्रेषु स्थानं कीदृशमिति यथासाध्यं प्रदर्शयति।

भक्तप्रियो भगवान्। भक्तस्य दुःखं भगवान् सोढुं न शक्नुयात्। भक्त इष्टदर्शनार्थं बहिरेव न भ्रमेत्तस्य हृदय एव भगवान्निवसति। तदर्थं श्रीनारदं प्रति श्रीभगवत उक्तिः –

**नाहं तिष्ठामि वैकुण्ठे योगिनां हृदये न च ।**
**मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥**[2] इति

श्रीमद्भगवद्गीतायामपि भगवत उक्तिः –

---

[1] श्रीमद्देवीभागवत, प्र.स्क. ८/३७

[2] पद्मपुराणम्

**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।**
**भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥**[1]

अर्थात् सर्वेषां जीवानां हृदय एव ईश्वरस्य निवासः। एतावत्सामीप्यसत्त्वेऽपि जनास्तमवगन्तुं न शक्नोति। यतोहि मायारूपयन्त्र आरूढाः सर्वे विभ्रान्ता भूत्वा भ्रमन्ति। केवलं भगवतः कृपयैव भक्तो मायामुक्तो भवितुं शक्नोति। एकादशाध्याये[2] भगवतोक्तं यदनन्यया भक्त्या, मदुपरि ऐकान्तिकनिर्भरशीलतया चैवाहं भकस्य समीपे सुलभोऽस्मि। भक्त्यैव ज्ञानलाभो भवति। ज्ञानलाभो नाम इष्टप्राप्तिः। यद्यपि भगवत्प्राप्त्यर्थ्यं ज्ञानकर्मभक्तिराजादयो नैके मार्गाः सन्ति तथापि साधारणानां कृते भक्तिमार्ग एव सर्वोत्तमः सरलमार्गश्चेति भगवत्पादस्य श्रीरामकृष्णपरमहंस्य मतम्। अनन्या भक्तिरेव भगवतः केवलः प्रियोऽस्ति। ब्रह्माण्डपुराणान्तर्गते श्रीललितोपाख्याने श्रीदेव्या उक्तिः - "ममैव पौरुषं रूपं गोपिकाजनमोहनम्" इति। अर्थात् लिङ्गभेदेऽपि वस्तुतस्तु तद्देव्या रूपान्तरमेव। पुनः तन्त्रराजे उक्तमस्ति –

**कदाचिदाद्या ललिता पुंरूपा कृष्णविग्रहा ।**
**वेणुनादसमारम्भादकरोद्धि वशं जगत् ॥**[3] इति

अत्राप्यभिन्नतैव प्रतिपादिता भवति। भगवान् श्रीविष्णुः स्वयमेकदा वीरभद्रमुक्तवान् –

**आद्या शक्तिर्महेशस्य चतुर्धा भिन्नविग्रहा ।**
**भोगे भवानीरूपा सा दुर्गारूपा च सङ्गरे**

---

[1] श्रीमद्भगवद्गीता १८/६१

[2] भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ (श्रीमद्भगवद्गीता ११/५४)

[3] श्रीललितासहस्रनाम, भारतभूषणकृतव्याख्या

**कोपे च कालिकारूपा पुंरूपा च मदात्मिका ।।**[1] इति

अर्थात् भगवत आद्याशक्तिश्चतुर्धा विविधविग्रहरूपा च, यथा भोगकाले भवपत्नी, युद्धे श्रीदुर्गारूपा, कोपे सा देवीकालिका पुरुषरूपेण ममैव (श्रीविष्णोः) रूपञ्च धरति। यथा श्रीमद्भगवद्गीतायां यदा यदेत्यादिना दुरात्मभ्यो भक्तानां रक्षार्थमधर्मस्य विनाशार्थं धर्मस्थापनार्थञ्च भगवत आविर्भावो भवतीत्युक्तमस्ति तथैव श्रीश्रीदुर्गासप्तशत्यामपि[2] देव्या अभिप्रायो भवति यद् यदैव दानवानां प्रादुर्भावेन विघ्नाः समुपस्थिता भवेयुस्तदा सा देव्याविर्भूय दानवविनाशं कुर्यात्। प्रागैतिहासिकयुगादारभ्य भारतवर्षे शक्तिपूजा प्रचलिता अस्ति। पञ्चसहस्राधिकवर्षेभ्यः पूर्वं पाञ्जाबप्रदेशस्य हरोप्पा सिन्धुप्रदेशस्य महेञ्जोदारो चेति नगरद्वये देवीपूजा भवति स्म यतोहि उक्तनगरद्वयस्य ध्वंसावशेषः सिन्धुनद्यास्तट आविष्कृतोऽभवत्। तत्र अनेकप्रकारका मृन्मय्यो देवीमूर्तयः प्राप्ताः, या देव्यो नगरद्वयस्याधिवासिनामाराध्या आसन् ।

**वेदे शक्तिवादः**

वैदिके कालेऽपि शक्तिपूजा प्रसिद्धा बभूव। ऋग्वेदस्य **देवीसूक्तम्,** रात्रिसूक्तं तथा च सामवेदस्य **रात्रिसूक्तं** दृष्ट्वा सुस्पष्टा धारणा भवति यद्वैदिक्यां परम्परायामपि शक्तिवादः सुदृढो बभूव। अष्टमन्त्रात्मकस्य वाक्सूक्तस्य[3] ऋषिः अम्भृणकन्या ब्रह्मविदुषी वाक्। तया ब्रह्मशक्तिं निजात्मरूपेण अनुभूय उक्तम् –

**अहं राष्ट्री सङ्गमनी वसूनां**

---

[1] श्रीललितासहस्रनाम, भारतभूषणकृतव्याख्या

[2] एकादशाध्याये

[3] वाक्सूक्तम्. (ऋग्वेदः १०/१२५) .

**चिकितुषी प्रथमा यज्ञियानाम् ।**
**तां मा देवा व्यदधुः पुरुत्रा**
**भूरिस्थात्रा भूर्यावेशयन्तीम् ॥** इति

अर्थात् अहमेव सर्वस्य जगत ईश्वरी, जनेभ्यो धनं प्रापयित्री, ज्ञानवती, पूजनीयेभ्यः प्रमुखा, अनेकेषु स्थानेषु स्थिता अनेकेषु प्राणिषु स्वयमहं प्रविशामि च। देवा मां विभिन्नेषु स्थानेषु विभिन्नेषु रूपेषु च स्थापितवन्तः। अर्थात् देवी ब्रह्ममयी, आदिभूता विश्वेश्वरी चेति कल्पिता। ऋग्वेदीयस्य रात्रिसूक्तस्य[1] मन्त्रद्रष्ट्रा ऋषिः कुशिकः, तेन उक्तम् –

**ओं रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः ।**
**विश्वा अधि श्रियोऽधित ॥** इति

अर्थात् ओंकारमयी सर्वव्यापिनी **भुवनेश्वरी** रात्रीदेवी सर्वेषु देशेषु तच्चक्षुस्स्थानीयैः महदादिभिः तत्त्वैः सर्वद्योतिता। अर्थात् स्वयं जगदाकारेण प्रकाशिता भूत्वा स्वकृतं जगत्प्रपञ्चं विशेषतया दृष्टवती। ततः प्रतिजीवं स्वस्वकर्मानुरूपं फलप्रदानमपि कृतवती। रा दाने इति धातोः रात्रिशब्दो निष्पन्न इति विशेषज्ञा वदन्ति। राति अभीष्टम् इति रात्रिः। जीवरात्रिरीश्वररात्रिश्चेति भेदेन रात्रिर्द्विविधा। जीवरात्रिरूपसुषुप्तौ प्रतिदिनं जीवानां व्यवहारो लुप्तो भवति। ईश्वररात्रिरूपप्रलयकाले ईश्वरव्यवहारो लुप्तो भवति। देवीपुराणे[2] उक्तं यत् –

**ब्रह्ममायात्मिका रात्रिः परमेशलयात्मिका ।**
**तदधिष्ठातृदेवी तु भुवनेशी प्रकीर्तिता ॥**

---

[1] रा.सू. (ऋ.वे १०/१२७)

[2] श्रीश्रीचण्डी, स्वामिजगदीश्वरानन्दकृतव्याख्या

अर्थात् रात्रीदेवी ईश्वरलयरूपा ब्रह्ममायात्मिका च। तस्या अधिष्ठात्री देवी हि भुवनेश्वरी या आद्याशक्तिरिति प्रसिद्धा। ऋग्वेदे विश्वदुर्गा, सिन्धुदुर्गा अग्निदुर्गा चेति देवीनां प्रसिद्धिरस्ति। यथाग्निस्तस्य दाहिकाशक्तिश्चाभिन्नौ तथैव ब्रह्म तच्छक्तिश्चाभिन्ने। अत्र अन्वयसहचार इति सम्बन्धो वर्तते। ब्रह्मशक्ती अभिन्ने इति शाक्तसिद्धान्तः सामवेदीयया केनोपनिषदा प्रतिपादितः। तत्र देवासुरसंग्रामे ब्रह्मणः शक्त्या देवा जिताः। किन्तु ते स्वशक्त्यैव जिता इति मत्वा गौरवान्विता बभूवुः। तेषां मिथ्याभिमानं दूरीकर्तुं ब्रह्म स्वयं तत्र आविर्भूतं बभूव। देवा ब्रह्मणः प्रकृतस्वरूपमज्ञात्वा ते प्रत्येकं तस्य समीपं गत्वा स्वशक्तिं प्रदर्श्य च विजिता भूत्वा प्रत्यागच्छन्ति स्म। परिशेषे इन्द्रे ब्रह्मणः समीपं गते तदन्तर्हितो बभूव। तत्र आविर्भूतां सुशोभनामुमां हैमवतीं पृष्ट्वा इन्द्रेण ज्ञातं यद् ब्रह्मशक्त्या देवा असुरसङ्ग्रामे जिताः। तथा च ब्रह्म देवानां शक्तिश्च परस्परमभिन्नम्। देवैः पृथक् शक्त्या गर्वो निरर्थक एवेति ।

साङ्ख्यायनगृह्यसूत्रे[1] भद्रकाली इति नाम प्रसिद्धमस्ति। हिरण्यकेशीगृह्यसूत्रे देवीभवानीं समुद्दिश्य यज्ञाहुतेः प्रथा वर्तते। शुक्लयजुर्वेदान्तर्गतायां वाजसनेयीसंहितायां देवीश्री-अम्बिका रुद्रस्य भगिनीरूपेण वर्णितास्ति। किन्तु कृष्णयजुर्वेदान्तर्गतायां तैत्तिरीयारण्यकानुसारं देवीश्री-अम्बिका रुद्रस्य पत्नी। तस्यैवारण्यकस्य नारायणोपनिषदि –

**तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।**
**दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥**

अर्थात् अहं वैरोचिनीद्वारा दृष्टाया अग्निवर्णायाः, निजतापशत्रुदहनकारिण्याः,

---

[1] श्रीश्रीचण्डी, स्वामिजगदीश्वरानन्दकृतव्याख्या

कर्मफलदात्र्याः श्रीदुर्गादेव्याः शरणं प्रपद्ये। हे संसारत्राणकारिणि देवि तां प्रणमामि इति। तैत्तिरीयारण्यकानुसारं याज्ञिकोपनिषदि[1] –"कात्यायनाय विद्महे कन्याकुमारीं धीमहि तन्नो दुर्गिः प्रचोदयात्" इति। आचार्यसायणानुसारं दुर्गिः दुर्गा च परस्पराभिन्ना। श्रीमार्कण्डेयपुराणान्तर्गता श्रीदुर्गासप्तशती भवति वेदमूला। सा प्रथमचरित्रेण ऋग्वेदस्वरूपा, मध्यमचरित्रेण यजुर्वेदस्वरूपा उत्तरचरित्रेण सामवेदस्वरूपा च भवति। चरित्रत्रयस्य छन्दो यथाक्रमं गायत्री, उष्णिगनुष्टुप् चेति। एतेन छन्दस्त्रयेन मन्त्रपाठस्य फलरूपेण ब्रह्मतेजसो लाभः, आयुसो वर्धनं परमानन्दस्य प्राप्तिश्च भवति। श्रीदुर्गासप्तशत्याः प्रारम्भ एव माता गायत्री छन्दोरूपेण आविर्भूतास्ति। श्रीगायत्री वेदमाता या श्रेष्ठो वेदमन्त्रः। त्रिसन्ध्यायां श्रीगायत्रीजपो वेदविहितोऽस्ति। प्रातः श्रीगायत्री ऋग्वेदधारिणी कुमारी, मध्याह्ने यजुर्वेदधारिणी युवती तथैवच सायाह्ने सा सामवेदधारिणी वृद्धा भवति। कुमारीवन्महाकाली ब्रह्मरूपा ब्राह्मी, युवतीवन्महालक्ष्मीर्विष्णुरूपा वैष्णवी तथा च वृद्धावन्महासरस्वती शिवरूपा माहेश्वरी। श्रीश्रीचण्डी श्रीश्रीगायत्री चोभ एव प्रणवरूपे। शास्त्रस्याभिप्राय एवं यत् "ऋग्भिः स्तुवन्ति, यजुर्भिर्यजन्ति, सामभिर्गायन्ति" इति। अर्थाद् ऋङ्मन्त्रेण परमात्मनः स्तुतिः, यजुर्मन्त्रेण तस्यार्चनं साममन्त्रेण च भजनं भवति। वेदमाता स्वयं चण्डीरूपेण प्रकटितास्ति।

**रामायणे शक्तिवादः**

श्रीदुर्गादेव्या अर्चनामन्त्रेऽस्ति – "रावणस्य विनाशाय रामस्यानुग्रहाय च। अकाले बोधिता देवी...." इत्यादि। कृत्तिवासकृते बङ्गीयरामायणे रामो रावणश्चोभौ

---

[1] या. उ. १०/१/७

देवीभक्तौ बभूवुः। शारदीया पूजा कृत्तिवासकल्पिता न, किन्तु बहुकालादारभ्य प्रचलति। किम्बदन्त्यनुसारं स्वयं श्रीरामचन्द्रो रावणस्य वधाय शरत्काले देव्या अकालबोधनं कृतवान्। केषाञ्चन मतानुसारं वासन्तीपूजा हि देव्याः प्रकृतपूजा। यद्वा भवतु, श्रीरामचन्द्रोऽष्टाधिकैकशतपद्मैः देवीपूजायाः सङ्कल्पं कृतवान्। तत्सङ्ख्याकानि पद्मान्यपि सङ्गृहीतानि। किन्तु भक्तस्य परीक्षार्थं देवी छलं कृतवती। तया एकं पद्मपुष्पं गुपिता। पूजायामेकस्य पद्मस्य अभावात् पद्मलोचनः श्रीरामचन्द्रः पूर्वसङ्कल्पं सत्यापयितुं स्वस्य नेत्रमुत्पाट्य देव्याः श्रीचरणे समर्पयितुं पुनः सङ्कल्पं कृतवान्। धनुर्वाणहस्तः प्रभुश्रीरामचन्द्र आविर्भूतया देव्या निराकृतः, अभीष्टवरदानेन श्रीरामचन्द्रोऽनुगृहीतश्च।

**महाभारते शक्तिवादः**

महाभारतस्य भीष्मपर्वणि युद्धारम्भाद् भगवान् अर्जुनाय दुर्गादेवीमुद्दिश्य स्तवप्रार्थनां विदधातुमुपदिष्टवान्। यथा –

**शुचिर्भूत्वा महावाहो संग्रामाभिमुखे स्थितः ।**
**पराजयाय शत्रूणां दुर्गास्तोत्रमुदीरय ॥**[1] इति

श्रीमद्भगवता आदिष्टोऽर्जुनो रथादवतीर्य कृताञ्जलिपुरस्सरं देवीमेवं स्तुतवान् –

**नमस्ते सिद्धसेनानि आर्य्ये मन्दिरवसिनि ।**
**कुमारि कालि कापालि कपिले कृष्णपिङ्गले ॥**
**भद्रकालि नमस्तुभ्यं महाकालि नमोऽस्तु ते ।**
**चण्डि चण्डे नमस्तुभ्यं तारिणि वरवर्णिनि ॥**

---

[1] महा.भी.अ.२३/२

**कात्यायनि महाभागे करालि विजये जये ।**
**शिखिपिच्छध्वजधरे नानाभरणभूषिते ॥**
**अट्टशूलप्रहरणे खड्गखेटकधारिणि ।**
**गोपेन्द्रस्यानुजे ज्येष्ठे नन्दगोपकुलोद्भवे ॥**
**महिषासृक्प्रिये नित्यं कौशिकि पीतत्रासिनि ।**
**अट्टहासे कोकमुखे नमस्तेऽस्तु रणप्रिये ॥**
**उमे शाकम्भरि श्वेते कृष्णे कैटभनाशिनि ।**
**हिरण्याक्षि विरूपाक्षि सुधूम्राक्षि नमोऽस्तु ते ॥**[1] इति

एवम्प्रकारेण अनेकसुललितश्लोकात्मिकां स्तुतिं कृतवान् सः। विराटपर्वणः षष्ठाध्याये युधिष्ठिरकृता इतोऽपि एका दुर्गास्तुतिर्वर्तते। द्वादशवर्षवनवासानन्तरं यदा पुनरेकवर्षस्य कृतेऽज्ञातवासाय पाण्डवा विराटनगरं प्रति गच्छन्ति स्म तदा ऋषीणां परामर्शेन अज्ञातवासस्य साफल्यार्थं युधिष्ठिरः श्रीदुर्गादेव्याः स्तुतिं चकार –

**नमोऽस्तु वरदे कृष्णे कुमारि ब्रह्मचारिणि ।**
**बालार्कसदृशाकारे पूर्णचन्द्रनिभानने ॥७॥**
**चतुर्भुजे चतुर्वक्त्रे पीनश्रोणि पयोधरे ।**[2] इत्यादि

**पुराणे शक्तिवादः**

मार्कण्डेयपुराणे एकाशीतितमाध्यायात् त्रिनवतितमाध्यायं यावदिति त्रयोदशस्वध्यायेषु देव्या माहात्म्यं सुशोभनरीत्या प्रकाशितमस्ति, यस्य प्रसिद्धिर्लोके देवीमाहात्म्यमिति नाम्नास्ति। अपि च, भवभूतिविरचितस्य मालतीमाधवस्य पञ्चमाङ्के

---

[1] महा.भी.अ.२३/४

[2] महा.वि.अ.६/७-८

कापालिकद्वयेन कृता देव्यास्तुतिः[1] –

**देवि चामुण्डे भगवति, नमस्ते ।**
**सावष्टम्भनिशुम्भसंभ्रमनमद्भूगोलनिष्पीडन-**
**न्यञ्चत्कर्परकूर्मकम्पविगलद्ब्रह्माण्डखण्डस्थिति ।**
**पातालप्रतिमल्लगल्लविवरप्रक्षिप्तसप्तार्णवं**
**वन्दे नन्दितनीलकण्ठपरिषद्व्यक्तं तव क्रीडितम् ॥** इति

पुराणेषु बहुत्र शक्तिवादो सुस्पष्टतया दृश्यते। भागवतपुराणस्य टीकाकारः श्रीधरस्वामी वदति – "अतो ब्रह्मणोऽपि स्वभावसिद्धाः शक्तयः सन्त्येव पावकस्य दाहकत्वादिशक्तिवत्"[2] इति। अर्थात् वह्नेर्दाहिकाशक्तिवत् ब्रह्मणः स्वाभाविक्यः शक्तयः सन्ति। मार्कण्डेयपुराणवद् अन्येषु पुराणेष्वपि देवीमाहात्म्यशीर्षकाध्यायोऽस्ति यथा देवीभागवतस्य प्रथमस्कन्धे भगवता सूतेनोक्तम् –

**साद्या शक्तिः परिणता सर्वस्मिन् या प्रतिष्ठिता ।**
**दाहशक्तिस्तथा वह्नौ समीरे प्रेरणात्मिका ॥**[3]

अर्थात् आद्याशक्तिः स्वरूपभेदेन सर्वेषु व्याप्तास्ति। सा ह्यग्नौ दाहिकाशक्तिर्वायौ च सञ्चारशक्तिः। तत्रैव -

**शिवोऽपि शवतां याति कुण्डलिन्या विवर्जितः ।**
**शक्तिहीनस्तु यः कश्चिदसमर्थः स्मृतो बुधैः ॥**[4]

---

[1] मा.माधव. ५ अङ्कः, २२

[2] श्रीश्रीचण्डी, स्वांमी जगदीश्वरानन्दः, उद्बोधनकार्यालयः, कलिकाता,

[3] श्रीदेवी.भा.प्र.स्क.अ.८/३०

[4] श्रीदेवी.भा.प्र.स्क.अ.८/३१

अर्थात् कुण्डलिनीशक्तिं विना शिवः शवाय कल्पते। पण्डितैः शक्तिहीनो जीवो निर्जीव इति कथ्यते। एवमेव तृतीयस्कन्धस्य पञ्चमेऽध्याये भगवता शिवेन भगवती स्तूयते –

**यदि हरिस्तव देवि विभावज-**
**स्तदनु पद्मज एव तवोद्भवः ।**
**किमहमत्र तवापि न सद्गुणः**
**सकललोकविधौ चतुरा शिवे ॥**[1]

अर्थात् हे देवि ! यदि भगवान् विष्णुः भवत्याः प्रादुर्भूतः स्यात् तथा च भगवान् ब्रह्मापि भवत्याः प्रादुर्भूतो स्यात् तर्हि किं ममोत्पत्तिर्भवत्या न ! हे शिवे ! भवती चराचरस्य संरचनायां सुदक्षास्ति। इतोऽपि –

**न तपसा न दमेन समाधिना**
**न च तथा विहितैः क्रतुभिर्यथा ।**
**तव पदाब्जपरागनिषेवणा-**
**द्भवति मुक्तिरजे भवसागरात् ॥**[2]

अर्थात् हे अजे ! यथा भवत्याः पदारविन्दस्य परागसेवया सुलभेन संसारसागराद्मुक्तिर्लभ्यते तथा मुक्तिस्तपस्यया, इन्द्रियदमनेन, समाधिना विविधवेदविहितैः कर्मभिरपि च न लभ्यते। इदानीं तत्र भगवता ब्रह्मणा कृता भगवतीस्तुतिः –

**अतोऽहञ्च जातो विमुक्तः कथं स्यां**

---

[1] श्रीदेवी.भा.तृ.स्क.अ.५/२

[2] श्रीदेवी.भा.तृ.स्क.अ.५/१९

**सरोजादमेयात्त्वदाविष्कृताद्वै ।**
**तवाज्ञाकरः किङ्करोऽस्मीति नूनं**
**शिवे पाहि मां मोहमग्नं भवाब्धौ ॥**[1]

अर्थात् अहं भवत्या निर्मितादद्भुतात् कमलादाविर्भूतः, आज्ञाकारी सेवकोऽस्मि च। अतोऽहं कथं मुक्तो भविष्यामि। हे शिवे ! अत्र भवसागरे पतितं मोहमग्नं मां रक्षतु। अपि च -

**न जानन्ति ये मानवास्ते वदन्ति**
**प्रभुं मां तवाद्यं चरित्रं पवित्रम् ।**
**यजन्तीह ये याजकाः स्वर्गकामा**
**न ते ते प्रभावं विदन्त्येव कामम् ॥**[2]

अर्थादस्मिन् संसारे जना भवत्याः सनातनपवित्रं चरित्रं न जानन्ति, ते मामेव ईश्वर इति वदन्ति। यो यजनकर्ता स्वर्गेच्छया यजति सोऽपि सर्वथा भवत्याः प्रभावं न जानाति। वृहन्नारदीयपुराणे देवी सर्वशक्तिमती विश्वप्रसविनी च ।

**उमेति केचिदाहस्तां शक्तिं लक्ष्मीं तथापरे ।**
**भारतीत्यपरे चैनां गिरिजेत्यम्बिकेति च ॥**
**दुर्गेति भद्रकालीति चण्डी माहेश्वरीति च ।**
**कौमारी वैष्णवी चेति वाराहीति तथापरे ॥**[3]

अर्थात् सा देवी केनचिदुमा, शक्तिः, लक्ष्मीर्वेति चिन्त्यते। तथा च सा भारती,

---

[1] श्रीदेवी.भा.तृ.स्क.अ.५/२९

[2] श्रीदेवी.भा.तृ.स्क.अ.५/३०

[3] श्रीश्रीचण्डी, स्वामिजगदीश्वरानन्दकृतव्याख्या

गिरिजा, अम्बिका, दुर्गा, भद्रकाली, चण्डी, माहेश्वरी, कौमारी, वैष्णवी वाराही चेति नाम्नापि लोके ख्याता ।

कालिकापुराणम्, देवीपुराणम्, मत्स्यपुराणं वृहन्नन्दिकेश्वरपुराणं चेत्येतेषु पुराणेषु दुर्गापूजाया विस्तृता पद्धतिर्लक्ष्यते। यद्यपि वृहन्नन्दिकेश्वरपुराणमिदानीं दुष्प्राप्यं तथापि तत्र वर्णिता दुर्गापूजापद्धतिरेव प्रायः सर्वत्र प्रचलितास्ति। बङ्गदेशे दुर्गापूजायाः सूचना बहुप्राचीनकालादेव। मुघलशासनकालेऽपि तस्या न्यूनता न दृष्टासीत्।

**बौद्धमते शक्तिवादः**

हिन्दुतन्त्रवद् बौद्धतन्त्रग्रन्था अपि नैके सन्ति। नालन्दा विक्रमशीला चेति विश्वविद्यालयद्वये विशेषतया तन्त्रशास्त्रस्यैव अध्ययनाध्यापनं भवति स्म। हिन्दूनां श्रीदुर्गासप्तशती एकदा बौद्धसन्न्यासिभिः विशेषतया समादृता आसीत्। केनचिद् बौद्धसन्न्यासिना स्वहस्तेन लिखिता श्रीश्रीचण्ड्याः काचित् पाण्डुलिपिर्नेपालदेशे प्राप्तास्ति। अनुमीयते यत् सा लिपिरेकसहस्रवर्षेभ्यः पूर्वमिति। बौद्धतन्त्रस्य विशिष्टो ग्रन्थोऽस्ति साधनमाला। तत्र दशमहाविद्याया विशिष्टः प्रभावः परिलक्ष्यते। यथा हिन्दुतन्त्रे वामाचारो दक्षिणाचारश्चेति द्विविधौ सम्प्रदायौ वर्तेते बौद्धतन्त्रेऽपि तथैव क्रियाचर्यादिभेदेन चत्वारः सम्प्रदाया भवन्ति। बौद्धतन्त्रानुसारं महाशून्याद् बीजमन्त्रस्य सृष्टिर्भवति। प्रत्येकं बीजमन्त्रः पृथक् पृथक् देवताया रूपं बिभर्ति। बौद्धतन्त्रे चतुराशीतिः सिद्धपुरुषा वर्तन्ते। ते सप्तमशताब्द्याम्, अष्टमशताब्द्यां नवमशताब्द्याञ्चाविर्भूय सान्ध्यभाषायां तन्त्रप्रचारं कृतवन्त इति श्रूयते। कामाख्या श्रीहट्टः प्रमुखादिस्थानानि बौद्धतन्त्रस्य प्राचीनकेन्द्ररूपेण परिचितानि सन्ति। साधनमाला इति बौद्धग्रन्थे श्रीतारादेव्या नैके भेदाः सन्ति। यथा आर्यखदिरवणीतारा, महत्तरीतारा, वरदतारा, वश्याधिकारतारा, वज्रतारा चेत्यादयः। तत्र वज्रताराप्रसाधनाय

उक्तम् –

**अथातः सम्प्रवक्ष्यामि वज्रताराप्रसाधनम् ।**
**होमकर्म्मविधानेन सर्वकामार्थसाधकम् ॥** इति

अपि च,

**मातृमण्डलमध्यस्थां तारादेवीं विभावयेत् ।**
**अष्टबाहुं चतुर्वक्रां सर्व्वालङ्कारभूषिताम् ॥** इत्यादि

अर्थात् सा तारादेवी अष्टबाहुयुक्ता, चतुर्मुखयुक्ता सर्वविधैरलङ्कारैश्च भूषिता। जापानदेशे सप्तकोटोबुद्धमातृका (चनष्टीदेवी कोटिश्री वा) इति नामधेया काचिद् बौद्धदेवी पूजिता भवति। तद्देशीयभाषायां चनष्टी नाम चण्डी। बौद्धसम्प्रदाये मारीचिदेवी दशभुजा, यद्यपि मूर्त्तिभेदेन सा द्विभुजा, चतुर्भुजा द्वादशभुजा वा। तिब्बतप्रदेशे बौद्धसन्न्यासिनो मारीचिदेवीम् ऊषादेवीरूपेण पूजयन्ति। बौद्धशास्त्रं "महावस्तु" इत्यनुसारं यदा बुद्धो जनन्या सह कपिलावस्तुनगरीमागतस्तदा तेन शाक्यवर्धनमन्दिरेऽभयादेव्याः पादवन्दना कृता। केषाञ्चिन्मतानुसारमभयादेवी दुर्गादेवी चोभे समान एव। चीनदेशस्य क्यान्टन इति नगरस्थे बौद्धमन्दिरे देव्याः काचित् शतभुजा मूर्तिरप्यस्ति।

**जैनमते शक्तिवादः**

जैनमतेऽपि शक्तिवादः प्रविष्ट आसीत्। राजस्थानप्रदेशस्य आबुपर्वते श्वेतप्रस्तरनिर्मितस्य मन्दिरस्य शिखरे षोडशदेवीनां मूर्तयो विराजन्ते। जैनमतावलम्बिनां श्वेताम्बरदिगम्बरा इत्युभयसम्प्रदायमन्दिरेषु सरस्वतीदेव्या अन्यदेवीनाञ्च मूर्तयो दृश्यन्ते। जैनमतावलम्बिनो देवीं सरस्वतीं शासनदेवीरूपेण स्तुवन्ति। रत्नसागर इति जैनग्रन्थे देव्याः सरस्वत्या यद्ध्यानं वर्तते तत्र देवी विश्वरूपिणी इति नाम्ना भूषितास्त।

द्वादशशताब्द्यां जैनमतानुसारं देव्याः सरस्वत्या नैकानि स्तोत्राणि नेके मन्त्राश्च रचितान्यभवन्। जैनमतानुसारं देवीसरस्वती भारती, सारदा, वागीश्वरी, ब्रह्माणी, ब्रह्मवादिनी इत्यादिभिः षोडशभिर्नामभिः परिचितास्ति। गुरुगोविन्दसिंहरचितस्य दशम-वादशाह इति ग्रन्थस्य चतुर्थे, पञ्चमे षष्ठे चांशे श्रीश्रीचण्ड्याः रूपस्य वर्णनास्ति।

**बङ्गदेशे शक्तिवादः**

सुप्राचीनकालादेव बङ्गप्रदेशे शाक्तसाहित्यस्य रचनायाः प्रथा प्रचलितास्ति। बङ्गभूमिः शाक्तभूमिरित्युच्यते। रामप्रसादसेनः कमलाकान्तभट्टाचार्यश्च प्रमुखानां साधकानां शाक्तगीतं बहुप्रसिद्धम्। पञ्चदशशताब्द्या ऊनविंशशताब्दीं यावत् बङ्गप्रदेशे बङ्गभाषायां विपुलपरिमितं शाक्तसाहित्यं विरचितम् आसीत्। एतानि पञ्चशतवर्षाणि श्रीश्रीचण्डीदेव्याः, दुर्गादेव्याः, अम्बिकादेव्याः, सरस्वतीदेव्याः, षष्ठीदेव्याः, लक्ष्मीदेव्या गङ्गादेव्याश्च प्रमुखानां देवीनां माहात्म्यसम्प्रचारोद्देश्येन बहुविधानि काव्यशास्त्राणि प्रणीतानि आसन्। शाक्तसाधकस्य श्रीरामप्रसादसेनवर्यस्य सुप्रसिद्धानि श्यामासङ्गीतानि विहायापि तस्य कालिकामङ्गलम् इति किञ्चन काव्यमप्यस्ति। श्रूयते यत् इदं कालिकामङ्गलं भारतचन्द्रविरचिताद् अन्नदामङ्गलात् परमस्ति। अपि च द्विजकमललोचनकृतं चण्डिकामङ्गलम्, कविभवानीप्रसादरायकृतं दुर्गामङ्गलम्, गोविन्ददासेन कृतं कालिकामङ्गलम्, शिवचरणसेनकृतं गौरीमङ्गलम्, हरिश्चन्द्रवसुकृतं देवीमङ्गलम्, रामशङ्करदेवकृतम् अभयामङ्गलञ्च प्रभृतीनि काव्यानि श्रीदुर्गासप्तशतीमुपजीव्य रचितानि सन्ति। बङ्गप्रान्त एकदा शाक्तसाधनास्रोतः प्रबलवेगेन प्रवाहितमासीत्। श्रूयते यत् वर्धमानमण्डलस्य ‘चान्ना’ इति ग्रामे प्रायः

कालीकीर्तनं भवति स्म। तत्र पुरातनश्मशाने विशालाक्षीदेव्या मन्दिरस्य पार्श्वे मातृसाधकश्रीकमलाकान्तस्य पञ्चमुण्ड्या आसनमासीत्। बङ्गस्य शाक्तसाधकेषु हालिशहर इत्यस्य श्रीरामप्रसादसेनः, वर्धमानस्य कमलाकान्तभट्टाचार्यः, वर्तमानबांलादेशान्तर्गतस्य नाटोरमण्डलस्य राजा रामकृष्णः, वीरभूममण्डलान्तर्गतस्य तारापीठस्य श्रीवामाचरणः, दक्षिणेश्वरस्य श्रीरामकृष्णपरमहंसः मेहार इत्यस्य सर्वानन्दठाकुरः चेति सर्वे प्रमुखाः प्रणम्याश्च। श्रीरामप्रसादसेनस्य कमलाकान्तभट्टाचार्यस्य च शाक्तसङ्गीतं बङ्गप्रदेशस्य अमरसम्पद्रूपेण परिचितमस्ति। एतादृशं सुललितं सुमधुरञ्च गीतम् अपरस्यां कस्याञ्चिदेव भारतीयभाषायां नास्ति। दक्षिणेश्वरस्य पञ्चवटी, हालिशहरस्य पञ्चवटी तारापीठञ्चेति साधनस्थलानि बङ्गप्रदेशस्य तीर्थरूपेण बहुलपरिचितानि सन्ति।

शक्तिरिच्छा ज्ञानं क्रिया चेति भेदेन त्रिधा। शक्तिं विना शिवः किमपि कर्तुं न प्रभवति। सौन्दर्यलहर्यनुसारं शिवशक्त्योर्मेलनेनैव शिवः स्पन्दितुं समर्थो भवति। अतः शक्तिर्हरिहरविरिञ्चादिभिर्देवैः सततमाराध्या। शिवो हमिति पदवाच्यः शक्तिः स चेति पदवाच्या। उभौ मिलित्वा हंस इति निर्माति। विपरीतरूपेण पुनः सोऽहमिति निर्माति। सोऽहमित्यतः सकारः हकारश्च निष्काश्यते चेत् ओमित्यवशिष्यते। ओमिति निर्गुणब्रह्मवाचकमक्षरञ्च। हंस इति जीववाचकं पदम्, सोऽहमिति ब्रह्मात्मैक्यवाचकं पदञ्च। या शक्तिर्हरिहरदेवैर्वन्दिता तस्या आमूलचूडावर्णनं मादृशसामान्यपुरुषलेखन्य-योग्यमिति शम्।

## सन्दर्भग्रन्थसूची

१. *महर्षि-कृष्णद्वैपायनवेदव्यासरचित महाभारत* (भीष्मपर्व)

मुरादावादनिवासीसनातनधर्मपताकासम्पादक (ऋषिकुमार) रामस्वरूपशर्माकृत हिन्दी-अनुवाद, सनातनधर्म यन्त्रालय, मुरादावाद, १९१७

२. *साधनमाला (प्रथमो भागः)*, विनयतोषभट्टाचार्यः, केन्द्रीयग्रन्थालयः, वरोडा, १९२५

३. *श्रीश्रीचण्डी,* स्वांमी जगदीश्वरानन्दः, उद्बोधनकार्यालयः, कलिकाता,१९८०

४. *श्रीमद्भगवद्गीता*, गीताप्रेस, गोरखपुर,

५. *यथार्थ गीता*, स्वामी श्री अडगडानन्दजी

६. *श्रीललितासहस्रनाम*, भारतभूषण, डा. ब्रह्मानन्दत्रिपाठी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली

७. *श्रीमद्देवीभागवतमहापुराण*, गीताप्रेस, गोरखपुर

८. *सौन्दर्यलहरी*, स्वामी विष्णुतीर्थमहाराज, १९४९

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

❑ ❑ ❑

# Advaita Philosophy Depicted in the Aṣṭāvakragítā

**Dr. Shylaja S**

The Indian philosophical system has two main divisions- The Astika, the theists and the Nāstika, the atheists. The former believe in the Vedic tradition and an omnipotent and omnipresent force while the latter does not. The Theists are again subdivided into six major schools viz the Sāmkhya, Yoga, Nyāya, Vaiśeṣika, Purva and Uttara Mímāmsā. The Uttara mímāmsā is otherwise known as Vedānta. Their thoughts are mainly based on the interpretation of the triology known as the Prasthānatraya which are the Upaniṣads, Brahmasutra and Bhagavat Gítā. There are also other works such as Brahmasutra Bhāṣya, Vivekachudamani, Avadutagítā, Yoga vāsiṣta etc, which are very important for the Advaitins. The Gíta Prasthāna is very important for the Vedāntins. There are many Gitas which are part of Purānas and upapurānas and those which are creation of individuals like the Ìśvara Gítā, Guru Gśtā, Brahma Gítā, Uddhava Gítā etc.

According to the Advaitins the aim of life is the liberation from the universal bondage through the knowledge of the Self. The knowledge of the Self provides us the knowledge about everything as we become aware that there is nothing separate from us. The verbal testimonies such

as "नेह नानास्ति किंचन"[1] stands as proof for this ultimate knowledge. To attain such a condition we should have knowledge with discrimination about the Self and NonSelf. It is rather a differentiation to avoid our suffering due to the bondage with the limited sensual pleasures. Thus knowledge about the Self is the only path to attain the everlasting enjoyment. This view is strengthened by these srutís "नान्यः पन्था विद्यते/यनाय", "तरति शोकमात्मवित्"[2]. Every human being spends his energy to avoid sorrows and to attain happiness. For attaining the limitless and everlasting happiness we should act according to scriptural knowledge. Among the list of Gitas the Aṣṭāvakragítā is very important as it speaks about the eternal knowledge.

**About the Author**

Aṣṭāvakra was an enlightened Sage of an ancient India. The Aṣṭāvakra means one having eight bends, thus the sage has eight bends on his body. The story of Aṣṭāvakra is seen in the Vanaparva of Mahābhārata, one among the Indian epics. There was a learned Riṣi named uddālaka, who was famous for his knowledge of the vedas and scriptures. Many students learned under him. One among them was Kahoda who pleased his Guru exceedingly with his devotion. So much impressed was Uddālaka upon Kahoda that after finishing his studies, he gave him his only daughter Sujāta in marriage. Even after the marriage, the couple continued to reside in the hermitage of uddālaka, where Kahoda assisted his father-in-law in teaching. In due course of time, Sujāta became pregnant. She was in the habit of sitting near her father and husband while they were teaching. Her unborn child in foetus attained mastery over the vedās by listening to his grandfather expounding them. Kahoda was not equally skilled as his Guru and made a number of mistakes while reciting the scriptures. Unable to bear these errors, the child started correcting them from his mother's womb.

Humiliated before his disciples, Kahoda cursed his son saying- "as you insulted your father, may you be born with eight bends in your body"[3]. Accordingly the child was born with his body crooked in eight places, and was named Aṣṭāvakra.

**Date of the work**

Aṣṭāvakragítā both in style and structure of composition closely resembles the epics. Scholars after laborious study and research have assigned the work to a period immediately after the Bhagavat Gita and just before the rise of the great philosophical schools. As the story of Aṣṭāvakra is seen mentioned in the Mahābhārata, the work must have been composed during the second stage of development of the epic that is between 1,400 BC and the beginning of the Christian era. The work must have appeared at a time close to the latter upaniṣads like Ṡvetāṡvetara, Mundaka, Māndukya etc. There is a suspicion of a reference to the Buddhist concept of non-existence. "The self is not in the object, nor is the objection this self ".[4]

**The Advaita philosophy in the Aṣṭāvakragítā**

The Aṣṭāvakragítā or the Aṣṭāvakra Samhita is a scripture that documents the dialogue between Aṣṭāvakramuni and Janaka the King of Mithila. The work has 20 chapters. Due to its philosophical nature it is also considered as a prakarana type of work. There are, as a whole 298 verses which is presented as a spiritual conversation between Aṣṭāvakramuni and king Janaka. There are 72 verses accredited to Janaka and 226 verses to the sage. The Aṣṭāvakragítā does not show any inclination towards accepting a personal God, as we find in the Bhagavat Gíta. In this sense, thoughts of Aṣṭāvakra are more faithful to the major upaniṣads and their monistic ideas.

The text starts with a question from the king Janaka –

"कथं ज्ञानमवाप्नोति कथं वा मुक्तिर्भविष्यति ।
वैराग्यं च कथं प्राप्तं एतत् ब्रूहि मम प्रभोः" ॥[5]

In this opening verse the disciple Janaka expresses his problems and the teacher, totally established in the experience of the Truth answers it. 'Know the self as pure consciousness the unaffected witness of the phenomenal world and you will be free'. This moral discipline liberates the mind from the sensual objects and diverts it inwards. This inwardness of the mind will enable the aspirant to realize his independence and detachment from the world. From the third verse on, the sage asks Janaka to negate the thought of himself being the subtle elements or its products.

"न पृथ्वि न जलं नाग्निर्न वायुः द्यौर्न वा भवान् l
एषां साक्षिणमात्मानं चिद्रूपं विद्धि मक्तये"ll

**Action of Latent Tendencies or Vāsanās**

The Vāsanās lead every human to his action. The subtle impulses and urgencies dwelling in the depth of a man's personality that ultimately determine the emotional and the intellectual profile of that individual are called vāsanās. The gross and the subtle equipments are needed for out pouring these vāsanās. Thus by exhaustion of vāsanās the subtle and the Gross bodies have no more functions. Merely with drawing the body consciousness is not sufficient. In deep sleep none of us have the body consciousness yet we have no spiritual experience. Meditation is an attempt to consciously withdraw our identification with the body and abide in ourselves. In Vedānta there exists two schools – one believes that freedom from bondage is possible only after death, when the body falls off. This is Videha Mukti[6]. The other school, headed by Aṣṭāvakra, Ṡankara and others declare that the realization of the self is possible even while the saint lives in his body. This is called Jívan Mukti. This Jívan Mukti state can be referred through a verse from the Yoga Vāsiṣṭa[7] 'if you can stay without vāsanās renouncing all, this very moment you are liberated' Sage Aṣṭāvakra, speaks about the exhaustion of vāsanās there

by freeing one from bondage[8] – If only you will remain resting in consciousness, seeing yourself as distinct from the body, then even now you will become happy, peaceful and free from bonds. In fact the Aṣṭāvakragítā has laid the foundations and indicated the path for the māňdukya kārika and for Yogavāsiṣṭa that expound the infinite oneness and the theory of non-creation of the universe (Ajāti vāda).

**The Self as a Witness**

The self is the witness; Sākṣi, indicating that the consciousness, which is the illuminator is not in any way involved in what it illumines. This witness is 'All pervasive (Vibhu), it is perfect (Purna). The self is the substratum for all the illusory names and forms. This self is non dual (एकः) and therefore ever free (मुक्तः). As consciousness it is by itself action less (अक्रियः) for eg. – All movements in the world can take place only in space but space by itself has no movement[9].

"आत्मा साक्षी विभुः पूर्ण एको मुकतश्चिदक्रियः l
असंगो निःस्पृहः शान्तो भ्रमात् संसारवानिव ll"

Aṣṭāvakra in the third chapter of his work defines the term brave-

"धीरस्तु भोज्यमानोऽपि पीड्यमानोऽपि सर्वदा l
आत्मानं केवलं पश्यन् न तुष्यति न कुप्यति" ll

'The man of wisdom is established in the Infinite Self and he is not agitated by the happenings around him be he feted and feasted or be hunted down and tormented by the world he meets his experience, in spontaneity of his quiet awareness. A man of wisdom acts but never reacts. A man who is unattached to all the worlds and has right discrimination and seek liberation never fear from the dissolution of the body'.

**Four ways to dissolution**

For the direct experience of the self i.e. to dissolve the perceiving

equipment and the perceived worlds of experiences Aṣṭāvakra uses the term Laya or dissolution. In the fifth chapter four methods for the dissolution are discussed.

“न ते संगोऽस्ति केनापि किं शुद्धस्त्यक्तुमिच्छसि l
संघातविलयं कुर्वन्तेवमेव लयम् व्रज” ll

The technique of ‘Laya’ starts with the ending of the body consciousness and then stage by stage it ultimately takes the seeker to the experience of the self. The first verse here refers to the ultimate truth that the entire illusory world has been super imposed upon us and keeping away this illusion, the supreme self has nothing to renounce for eg:- when we see a post in the darkness we super impose many objects like a ghost, a tree, a person etc on it. When we realize the truth we realize that the post is untouched by any of these objects. Aṣṭāvakra compares this world and its objects to sea water and bubbles (V-2). The bubbles rising from the sea takes different forms but ultimately it deforms to water. Similarly this universe springs up from the self. So in the second stage the seeker should try to dissolve his mind and its desires to minimize the desire for different objects. In the third stage the universe itself is negated and dissolves into the consciousness of the mediators. Annapurňopaniṣad says –

“पथा विषण्णा लोका विहरन्तोऽप्यसत्समाः l
असंबन्धात् तथा ज्ञस्य ग्रामोऽपि विपिनोपमः” ll

One who has accomplished dissolution enjoys the aloneness where he forgets himself and even in a crowded place this aloneness is not disturbed. In the fourth stage the person remains unmoved by pain or pleasure, hope or disappointment.

**Conclusion**

The final spiritual experience in the Aṣṭāvakragítā is the culmination in the sovereign unity of the self that dissolves all duality;

that is the dissolution of the Tripuṭi Jnāna viz., the knower, knowledge and the knowing. It is the experience of the silence of one's own deepest meditation. There is an anecdote[10] concerning a meeting between Swāmi Vivekānanda and Swami Ramakriṣna paramahamsa. When Swāmi Vivekānanda first came to visit Swami Ramakriṣna, Swami Vivekānanda was extremely argumentative, he was an Atheist and a rationalist. He searched for proof everywhere. Sensing Vivekānanda's great potentiality and promising features a cry of anguish and compassion rose from Swami Ramakrishna. He asked Vivekānanda to forget all his anxiety. He told that "we'll talk about proof and such things alter. I have become a little old, I have difficulty in reading. You are young; your eyes are still strong. So, read from the book lying there". It was the Aṣṭāvakragítā. Vivekānanda saw anything wrong in this, fellow was not requesting anything special. He read three or four verses and suddenly every cell began trembling. He started panicking and refused to read. Ramakriṣna insisted, "Go ahead and read. What harm can there be in it? How can this book hurt you? I must hear this book – read it to me" Vivek¡nanda kept on reading aloud from the book and disappeared in meditation. So why did Ramakriṣna ask Vivekānanda to read the Aṣṭāvakragítā? It is because there is no simple and purer statement of truth than this Gíta. The words can penetrate deep and can awaken our sleeping souls.

Janaka after hearing Aṣṭāvakragítā's discourse on Ëtmavidya experiences the truth and he puts it thus –

'अनन्तमिव मे वित्तं यस्य मे नास्ति किंचन l
मिथिलायां प्रदीप्तायां न मे किंचन दह्यते' ll

'Infinite is indeed my wealth of which nothing is mine. If Mithila is burnt nothing that is mine is burnt.'

Janaka also declares –

¨ मे नास्ति किंचन अथवा मे सर्वम्

'In fact, nothing belongs to me or in another way everything is mine.'

This has been declared in the Iśāvāsya upaniṣad –

'यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति l
सर्वभूतेषु चात्मानम् ततो न विजुगुप्सते 'll

One who recognizes all names and forms as his own Self and recognizes his own Self in every name and form, to such an individual there is no revulsion in life. This indeed is the Sum and Substance of this great work.

**References**

1) छान्दोग्योपनिषद्, बृहदारण्यकोपनिषद्
2) श्वेताश्वेतरोपनिषद्, छान्दोग्योपनिषद्
3) A short history of Sanskrit literature by T.K. Ramachandra Iyer, p. 32, Vadyar & Sons, 2002.
4) नात्मा भावेषु नो भावस्तत्रानन्ते निरञ्जने l
इत्यसक्तोऽस्पृहः शान्त एवदेवाहमास्थिताः ll (Chap : VII, Verse IV)
5) Oh lord! Show me the path to attain the right knowledge, ho no can I be enlightened and how can I be free from the worldly pleasures.
6) Aṣṭāvakragítā, by Swami Chinmayānanda, Chinmaya Publication, p. 10.
7) यदि सर्वं परित्यज्य तिष्ठ्त्युत्क्रान्तवासनः l
अमुनैव निमेषेण तन्मुक्तोऽसि न संशयः ll
8) Aṣṭāvakragítā, Ch : I Verse 4
9) ibid - 23
10) The Māghgítā – Vol I, Osho, p.12

Assistant Professor

Department of Sanskrit
N S S College, Pandalam

❑❑❑

# Role of Yoga for Stress Management in Information Technology Industry

**Dr. M. Mary Sujatha &**
**Dr D. Jyothi**

**ABSTRACT**

A productive workforce is the most important factor for the success of an organization. This calls for the overall well-being of the human resources in that organization. On other hand, stress negatively affects one‘s health, performance on the job, social life and the relationship with family members. The stress response is a complex emotion that produces physiological changes to prepare one to defend oneself from the threat or flee from it. Stress is something most people deal with on an everyday basis. Stress at the workplace has turned out to be a major concern for various organizations and has reached alarming proportions especially in information technology based industries. Development of stress reduction and stress management programs by the organizations is the need of the hour. In today‘s highly dynamic and competitive scenario,

one is exposed to many stressors in all genres of life. Stress is a silent killer, and prolonged exposure to stress may have harmful effects on physical, psychological, social and behavioral well-being of an individual. Fortunately, every problem has a solution. There are different stress management and stress reduction techniques. Yoga is one such technique which is used to cope with stress. Yoga is an ancient, Indian art and science that seeks to promote individual health and well-being through physical and mental exercise and deep relaxation. Preliminary studies suggest that yoga may be beneficial in the treatment of some chronic conditions such as asthma, anxiety, stress, high blood pressure among others. Yoga encourages mental and physical relaxation, which helps reduce stress and anxiety. The physical postures promote flexibility, relieve tension, and alleviate pain. Yoga poses may help you release physical blockages like muscle knots, helping release emotions and tension.
**KEY WORDS**
Stress, Information Technology (IT), Perceived Stress Scale(PSS), Job Anxiety Scale (JAS), Yoga.

## I. INTRODUCTION

The industrial workers are exposed to stress and strain due to the tough nature of their duties. There is a need to incorporate simple, cost effective, and easily implementable measures in the industries to tackle this menace of stress. Major events such as mergers, downsizing, new technologies, and industry changes may be sources of job insecurity and perceived threat. It was also noticed that job anxiety could lead to work related phobia, which is a feeling of panic when approaching work or thinking about work. Being in a continuous state of anxiety and perceived stress gives rise to health issues for IT professionals, with depression being the major health concern. In a study conducted on computer related health problems among software professionals in Mumbai, Maharashtra and other parts of India, it was concluded that

ocular discomfort, musculoskeletal disorders, and psychosocial problems form the key category of health problems [1]. In a study conducted on professional stress, depression, and alcohol use among Indian software professionals, it was observed that the software employees were professionally stressed due to job conditions and were at 10 times higher risk for developing depression, there has also been a significant increase in the incidence of psychiatric disorders [2]. The term "stress" was firstly introduced into life science by Hans Selye in 1936. The term "stress" is derived from the Latin word "Stringere" which means "to be drawn tight" [3]. There are no formal coping mechanisms or grievance handling procedures for stress in the organizations. If due attention is not given to the stress of employees at workplace, then it may cost the organization a lot in terms of inefficiency, reduced productivity, increased absenteeism, medical bills, more compensation etc. It is, therefore, important to employ effective stress management techniques in order to ensure a stress free workforce which would enhance the productivity of the organization. Yoga is one such technique which is helpful in managing stress. Hence this study was undertaken to evaluate the psychological benefits of yoga in workers.

## II. OBJECTIVES OF THE STUDY

Various studies have highlighted the importance of yoga. The benefits of yoga are not limited to physical health but it helps in the overall development of human. Yoga tells a person the way of life. The main objective of this study is

1. To know about effects of stress on human life.
2. To know that yoga contributes to overall development of human.
3. To study the relationship between yoga postures and stress management.

## III. METHODOLOGY

It is an attempt to express the importance of yoga in stress management and hypothesis shows there is significant relationship between yoga styles and stress management in software industry.

### 3.1 Stress and its Symptoms

The word "stress" is defined as the pressure that causes a person to remain in an anxious and unhappy state of mind. Stress affects the person mentally in which the person remains immersed in long anxiety. The person does not behave normally and behaves differently physically and psychologically as well. Excess stress makes a person physically weak and he is not able to complete any work efficiently. Stress is directly affected by the external environment. Scholars believe that stress is not always the cause of sorrow and anxiety, sometimes stress also motivates a person. Stress is not always destructive. Its also brings good changes in the person at time which provides progress in human life and work life. Outcomes of stress can be classified as physiological, psychological and behavioral [4]. In the following grounds stress classification with respect to its outcomes were listed in table 1.

| S.No | Classification | Outcome |
|---|---|---|
| 1 | Physiological | 1Heart rate increase<br>2.Hypertension condition<br>3.Increase in respiratory rate<br>4.Digestive system Impaired<br>5. Gastrointestinal ulcer<br>6. Kidney disease<br>7. Heart attack<br>8. blood clotting |
| 2 | Psychological | 1.Deep concern<br>2. To be restless<br>3. Sleep Disturbance<br>4. Getting tired of work<br>5. Being dissatisfied with work<br>6. Decrease in decision Making<br>7. Constantly worried |

| | | |
|---|---|---|
| 3. | Behavioral | 1.Impatience<br>2. Absence from work<br>3. Hastiness<br>4. Non-cooperation of peers<br>5. Distance from social gathering<br>6. Being drug abuse<br>7. Lack in efficiency |

*Table 1: Stress outcomes classification.*

### 3.2 Findings

Yoga is considered useful only for physical benefits its continuous practice can also have the benefit of reducing mental stress, which includes spirituality, well-being and superiority.

1. Yoga is very effective in stress controlling [5]. It increase cortical arousal and reduced limbic arousal, which increase perceptual awareness and reduce emotional reaction. It affects sympathetic and parasympathetic nervous system in positive manner.
2. There are some asanas of yoga that can be done at the workplace, by practicing for a few minutes or hours, reduce the stress and boredom of work.
3. It is clear from the study that yoga is a very effective mechanism in reducing stress, which brings positive changes in the mental state of the person.
4. Yoga connects the person with spirituality and develops his entire personality and gives a good identity in the society.
5. When the amount of stress is reduced by yoga, a person works more efficiently by being motivated in his work.
6. The benefits of Yoga includes stress control, sound sleep, reduced cortisol levels, cure to many medical conditions, allergy and asthma relief, lower blood pressure cure, smoking cessation help, lower heart rate cure, spiritual growth, well-being, anxiety and muscle tension

cure, increased strength and flexibility and slow aging process[6].

7. One of the key features of Yoga is body-mind-spirit unity [7]. Yogic postures and kriyas are helpful to achieve healthy body, while breathing techniques and meditation are helpful in clarity of mind and emotional balance.

### 3.3 Recommendations: Yoga versus Occupational Stress

Over the past few decades, the information technology (IT) industry in India has been a story of huge success. It is also estimated that revenues of the IT industry are bound to increase in the years to come and thereby provide more employment opportunities to the Indian workforce. While it is time to celebrate and feel proud of this huge success, one cannot forget the all-round effect of the IT industry on the work lives and personal lives of Indian IT professionals. IT professionals are always under constant pressure to deliver services efficiently, along with being cost efficient. Indian IT professionals also need to continuously align to the country time zones of customers, which affects their sleep schedules. The current working conditions are prone to generate a lot of job anxiety for most India based IT professionals as all project contracts are generally of a short term duration. A study conducted on professionals from IT services and IT enabled services working in Bangalore, Karnataka, India (IT capital of India), alarming facts were found: 31% of the professionals were found to be hypertensive with approximately 5% having malignant levels of hypertension [8]. Health issues such as asthma, back pain, and peptic ulcer are also not uncommon among IT professionals. Issues such as anxiety and depression can be attributed to mental ill-health. Yoga is an ancient science that aims to empower one with sound physical/mental health and thereby provides mastery over modifications of the mind. Job anxiety scale (JAS) as developed by A.K. Srivastava (1977) was used for assessing the job anxiety in IT professionals. Job anxiety constitutes of concerns in the components, namely- security, recognition, human relations at work, reward and

punishment, self esteem, future prospects, and capacity to work as per JAS scale [9]. The questions in JAS scale have binary options such as “yes” or “no.” PS was measured through the perceived stress scale (PSS)[10]. questionnaire developed by Sheldon Cohen. PSS questionnaire was designed to tap how unpredictable, uncontrollable, and overloaded respondents find their lives. The questions in PSS scale have five options for each question in order to take a snapshot of the existing mindset of the participants. Table-2 shows few recommendations to deal with occupational stress from practicing yoga.

| **S. No** | **Method** | **Description** |
|---|---|---|
| 1 | Pranayama and Stress Management | Pranayama is helpful in stress management. Based on a research study [11] conducted on experimental group, did pranayama for five week. The experimental group reported decrease in stress and control in their emotions. |
| 2. | Ashtanga-Vinyasa Yoga and Stress Management | It was found that Ashtanga Yoga is helpful is stress management and improve mental health. Vini Yoga is helpful in significant reduction in stress and sleep difficulties. It also improves breathing rate and heart rhythm coherence[12] |
